CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

सौन्दर्यलहरी

(म[illegible] टीकासहित)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौन्दर्यलहरी

द. नं. १६८६४

१४२५

पृ. २२।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा - टी
१

प१

नमामि परमं देवं शिवं शान्तमनामयं शिवांवँत्प्रसादेन शिवेत्स्त्याद्दिकर्त्तृता १ श्रीविश्वनाथतनयः सर्वविद्याविशारदः रामभद्रो विवृणुते सौन्द
र्यलहरीस्तुतिं २ श्रीशंकरकृतां पुण्यां सौन्दर्यलहरीस्तुतिं व्याख्यातुमारभे भक्त्या हनुमदीक्षितात्मजः ३ ननु कथं परमहंसपरिव्राजकाचार्यस्य प
रित्यक्तसकलविषयस्तु त्वस्य परब्रह्मविदः श्रीशंकरभगवतो भवान्याः सौन्दर्यवर्णने प्रवृत्तिरनौचित्यादिति चेत् न भवान्या ब्रह्मरूपत्वेन ब्रह्मवर्णन
मेव भवानीवर्णनमिति तन्नानौचित्यमिति वदामः ननु कथं ब्रह्मरूपता भवान्याः शूलपाणिपत्नीत्वप्रतीतेरिति चेन्न श्रीकृष्णावतारेषु पुंस्त्वप्रतीतेरिव
भवान्याः स्त्रीत्वप्रतीतेः ननु तथापि किमत्र प्रमाणमिति चेत् स्त्रीसंज्ञो लोकभावनः चितिरूपेणया कृत्स्नमेतद्व्याप्य स्थिता जगदित्येवमादिपर

॥श्रीशंकर उवाच शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दि
तुमपि अतस्त्वामाराध्यां हरिहरविरिंच्यादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति १

शक्ति

मार्षवचनजातं प्रमाणमिति ब्रूमः अथ वाँशक्तिमतोरभेदोपचाराद्ब्रह्मरूपत्वं भवान्या इति न किंचिदसमंजसं प्रवृत्तमनुरुत्यमः अथ चिकीर्षि
तस्य ग्रंथस्य निर्विघ्नपरिसमाप्तिकामः परमशिवशिरोमणिः श्रीशंकराचार्यः परं ब्रह्मानुसंधानरूपं मंगलमाचरयति शिव इति शिवः वि
शुद्धं चैतन्यं शक्तिर्माया तया शक्त्या युक्तः शिवो यदि भवति तर्हि प्रभवितुं ईशितुं जगत्त्रयं तदमित्यर्थः शक्तः समर्थो भवतीत्यनुषज्यते देवः
शिवो न चेदेवं शक्त्या युक्तो न तर्हि स्पंदितुं चेष्टितुमपि कुशलः शिक्षितः समर्थो न भवतीत्यर्थः खलु निश्चितं कुतः पुनः स्रष्टा

रम
१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिकारणसामर्थ्यं तस्यैव शिवस्य । यतस्त्वदधीनमेव शिवस्य परमेश्वरत्वमतस्त्वां हरिहरविरिंच्यादिभिरप्याराधयितुं योग्यां अकृ
तपुण्यः प्राचीनानेकजन्मोपार्जितपुण्यरहितः साधारणो जनः प्रणन्तुं नमस्कर्तुं स्तोतुं वा कथं प्रभवति समर्थो भवति न कथमपि
इत्यर्थः । एतेनानेकजन्मोपार्जितनित्यनैमित्तिककर्मभिः कामकर्म्मजनितपुण्यहान्तःकरणो भगवत्याराधनेऽद्य भगवत्या आराधने
धिकारी भवतीति सूचितं । हरिहरविरिंच्यादिभिरित्यत्र कर्तृकरणयोस्तृतीयेति कर्त्तरि तृतीया । आदिशब्देनेन्द्रादयो गृह्यन्ते ॥
हरिशब्दस्य घिसंज्ञत्वाद अर्हितत्वाद्वा पूर्वनिपातः । ननु चेदित्यनेन शक्याशक्ययोगे वक्रममनुचितः तस्य कं प्रसिद्धेरिति चेत् मैवं मो सिद्ध्य ५
हेदशायां शक्याशक्ययोगस्य निश्चयात् कुशलः शिक्षिते त्रिष्विति मेदिनीकरः ॥ १ ॥ (इयप्र) अथ भवान्याश्चरणप्रसादलेशलब्धसृ
ष्ट्यादिशक्तिकानां हरिहरविरिंचीनां सृष्ट्यादिकर्तृत्वं दर्शयन् मायाशक्त्यादिशब्दवाच्यां भवानीं स्तौति श्रीशंकराचार्यः त
नीयांसमिति । विरिंचिर्ब्रह्मा लोकान् विरचयति विशेषेण रचयति । विरचनक्रियां विशिनष्टि अविकलमिति विगता
कला तत्कर्मकौशलं यस्या विरचनक्रियायास्तादृक्कलेन विकलमविकलं । अथवा कला अंशस्तद्रहितं विकलं न विक
लमविकलं साङ्गमित्यर्थः । क्रियायाः व्ययविशेषणानां क्लीवत्वमेकवचनान्तत्वञ्च वाच्यमिति वचनात् क्लीवतां । विरिंचेर्लो
कविरचने कृतत्वसामर्थ्यमित्याकांक्षायां भवानीचरणकपालेशमेव हेतुं वदन् विरिंचिं विशिनष्टि संचिन्वन्निति । किं कुर्व
न् । अधाराणेऽहे जननि तव चरणपङ्केरुहभवं पांसुं तनीयांसमतिशयेन तनुं सूक्ष्मं संचिन्वन् वर्त्तुलीकुर्वन् हे नवत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शतृप्रत्ययः विरिंचेर्विश्वजननसामर्थ्यं त्वच्चरणप्रसादलेशाधीनमिति तात्पर्यं इदानीं श्रीविष्णोरपि जगत्पालनसामर्थ्यं त्वत्पादपद्मप्रसादलेशलभ्यमित्याह वहतीति शौरिः शूरपुत्रः श्रीकृष्णः एनं तच्चरणपंकेरुहपांशुं सहस्रेण सहस्रसंख्याकेन शिरसा शिरसामिति पाठे सर्वं पूर्ववत् संख्यासंख्यावतोश्चाधाराधेयभावसंबंधः वहति धारयति कथमपि दुष्करं यत्नेन सहस्रशिरस्त्वमस्य सहस्रशीर्षा पुरुष इत्येवमादिश्रुतिप्रसिद्धं हरस्यापि जगत्संहर्तृत्वं त्वत्पादपद्मप्रसादलेशजमेवेत्याह हर इति हरः संक्षुभ्यक पिं

तनीयांसं पांसुं तव चरणपंकेरुहभवं विरिंचिः संचिन्वन्विरचयति लोकानविकलं वहत्येनं शौरिः कथमपि सहस्रेण शिरसा हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिं २ एषएनः

दं जगत्संहरेयमिति संक्षोभं प्राप्नुवन्नेनं त्वच्चरणपांशुं भजति सेवते कथंभूतं भसितोद्धूलनविधिं भसितं भस्म तस्योद्धूलनमङ्गप्रक्षेपतस्य विधिं विधायकं येन पांशुना जगद्वीतस्पृहं मुक्तिपतितमिति वार्थः हरः संक्षुद्यैनमिति पाठे क्षुद संचूर्णने इत्येतस्मात् ल्यपि संक्षुद्येति तथा चायमर्थः हरतीति हरः जगत्संहारकारी श्रीमहादेवः एनं हरिविरिंचिसेव्योपयुक्तं तव चरणपांशुं संक्षुद्य चूर्णयित्वा भसितो

एम २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हननविधिं स्वदेहे तस्मात्ते पृविधिं भजन्ति सेवन्ते विधिशब्दोऽत्र भावप्रधानः ननु भजधातोरुभयपदित्वात्कथं परस्मैपदमेवोदाहृतमिति वेत्यात्मेवं स्वरितञितः कर्त्रभिप्राये क्रियाफले इति पाणिनिवचनेन नियमे सति हरिहरादिकर्तृकाणां भजनस्य फलस्य द्वारा सकलसंसारिक्षि मणफलकस्य परस्मैपदोदाहरणस्यैव संभवात् नहि स्वात्मारामस्य महादेवस्य किंचित्स्वकीयं प्रयोजनमस्ति जगत्संहारोऽप्यनेन लोकानुग्रहणं। यत्प्रसादेन हरिहरविरिञ्चीनां सृष्ट्यादिसामर्थ्यं सैव परमसेव्येति भावः १ एवं तावज्जगदीश्वराणामप्यनुग्राहकत्वमुक्तं श्रीभवान्या इदानीं धर्मादिपुरुषार्थचतुष्टयसमर्पकत्वेन सकलसंसारिणामप्यनुग्राहकत्वं दर्शयन्स्तौति अविद्यानामिति अविद्या ज्योतिष्टोमादीनि कर्माणि तासामंतस्तिमिरमिहिरोद्दीपनकरी भवति अन्तर्मध्ये शरीरस्य तिमिरं धर्माः धर्माज्ञानं तस्य नाशकत्वात् मि

अविद्यानामन्तस्तिमिरमिहिरोद्दीपनकरी जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी
दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती २

हिरसूर्य इव धर्मादिज्ञानं तस्योद्दीपनकरी अन्तस्तिमिरमिहिरद्वीपनगरीति पाठे अन्तस्तिमिराणां नाशकत्वात् मिहिरा इव यानि धर्मज्ञानानि तेषां द्वीपमध्ये नगरीव नगरी भवतीति वासस्थानमित्यर्थः एतेन धर्मज्ञानद्वारा धर्मानुष्ठानहेतुत्वमुक्तं विद्यावाऽविद्या च पुस्तके दृश्यते ४ सहेत्वेवमादिस्मृतौ धर्मो अविद्याशब्दवाच्यत्वं प्रसिद्धमेव विषयसुखहेतुत्वमाह जडानामिति जडानां विषयलंपटानां संसारिणां चैतन्यानि स्रक्चन्दनादिविषयज्ञानानि तानि स्तबकाः स्वर्गापातरमणीयत्वात् तज्जन्यो यो मकरन्द इव विषयसुखं तस्य स्रुतिः स्रावस्तिः सरणनाडी भवति एतेनैतस्यैवानंदस्यैवमादिस्मृतिषु च विषयानन्दहेतुत्वं प्रसिद्धमेव भवान्या इदानीमर्थहेतुत्वम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह रिगणमिति हरिगणानां चिन्तामणिगुणनिका चिंतामणिः चिन्ताभवनी चिन्तामणिर्यथा चिन्तितः सेवकेभ्यः फलं प्रयच्छति तद्वत्त्वमपीत्यर्थः
यद्वा चिन्तामणिगुणनिका चिन्तामणिरूपा अस्याक्षि चिन्तामणि वा कृत्स्नमित्यर्थः मोहहेतुतमाह जन्मजलधौ संसारे निमग्नानां सेवकानां मुर
रिपुवराहस्य दंष्ट्रेव भवती ज्ञानदानद्वारा संसारहेतुता । एतेन पुरुषार्थचतुष्टयसमर्थकत्वेन सेवपरमसेव्यत्वमुक्तं भवति भवेद्गु
णनिकानंभस्याक्षिपाऽस्मि ख्येतविति मेदिनीकरः ३ इदानीं तन्नदेवताभ्योऽधिकफलदातृत्वेन भवानी स्तौति तदन्यदिति तदि

तदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया
भयात्त्रातुं दातुं फलमपि च वांछासमधिकं शरण्ये लोकानां तव चरणा वेव निपुणौ ४

हि

तिपंचम्यंतं तत्तदन्यो देवतगणः पाणिभ्यां करा भ्यां अभयवरदः अभयेन भयाभावेन सह वरं ददातीति तथा अथवा न विद्यते
भयं यस्मिन्सोऽभयः स चासौ वरश्चेति ददातीति तथा सर्वं हि साकांक्षिय पापरिसमाप्यत इति न्यायेन भवतीति क्रियापदमध्याहार्यं
तदन्य इत्येकं पदं वा पंचमी भये नेति योगविभागात्समासः इदानीं तन्नदेवताभ्योऽधिकफलदातृत्वमाह भवान्यास्तवनि प्रकटित
वराभीत्यभिनया त्वमेवैका केवला नैवासि किंतु देवलोकानां शरण्ये तव चरणावपीत्यन्वयः वरश्च अभीतिश्च वराभीते अभि॥ राम ३

नयती अग्निमुखेन नयति प्रापयतीति तथा तत्तत्कर्म्मफलदात्रीत्यर्थः चरणौ विशिनष्टि भयात्त्रातुं वांछासमधिकं च फलं च दातुं तौ ज्योति
ष्टोमेन स्वर्गकामो यजेतेत्येवमादिश्रुतिप्रसिद्धं वांछातोऽधिकं फलं मोक्षरूपं हि शब्दः श्रुतिप्रसिद्धमाह एवकारोऽप्यर्थः चरणः
शरणेः सनि ष्कामभक्तिलक्षकः तत्तत्कर्म्मफलदानवैषम्यं भवान्याः सकामनिःकामभक्तिभेदेनेति द्रष्टव्यं शरणशब्दो र
क्षितृवाचको रक्षणपरो द्रष्टव्यः तथा च सति शरणं कर्त्तुमर्ह इति योग्या भवतीति शरण्या तत्संबोधनं तथा अथवा तत्तद्देव
तारूपेण तत्तत्कर्म्मफलदातृत्वं भवान्या दर्शयति कामनिष्कामभक्तिभेदेन तत्तत्कर्म्मफलवैचित्र्यमाह त्वदिति त्वत्तोऽन्यो
ऽन्यत्वेन प्रतीयमानो दैवतगणस्त्वमेव नैवास्ति किंतु त्वमेव तत्तद्देवतारूपासीत्यर्थः ननु तत्तत्कर्म्मफलदातृत्वं तत्तद्देव
तासु प्रसिद्धमित्यत आह केनेति प्रकटितवराऽभीत्यभिनयात्तत्तत्कर्म्मफलदात्री एकाग्रत्वात्त्वमेव भवान्याः निःकाम
भक्तेरधिकफलत्वमाह भयादित्यादिना अस्मिन्पक्षे एवकारोऽवधारणार्थः एवं लौकिकवैदिकसाधनतत्तत्कर्म्मफ
फलं दातृत्वमन्तर्यामिणः एवं सकलश्रुतिसिद्धं तदभेदाद्भवान्या इति भावः अन्यत्समानं एतत्फलमतउपपत्ते
रित्यत्र निर्णीतमेव ४ एवं तावत्तत्तत्कर्म्मफलदातृत्वमन्तर्यामिरूपेण भवान्या अभिधायेदानीं तत्तन्मोहक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रमयन्

त्वमपि हरिस्मरयोः श्रीमद्वान्यधीनमेवेति भवानीशेति हरिरिति प्रणतजनसौभाग्यजननी भक्तजनसौन्दर्यहेतुभूतां अथ वा प्र
णतजनानां सौभाग्याय जननीमाताराधिवपुत्राणांच सौंदर्यमात्र ध्रीनमेवेति प्रसिद्धमेव पुरा अमृतार्थ देवदैत्यकलहानन्तरं श्री
श्रीमहादेवस्य मोहिनीरूपदिदृक्षासमये नारीभूत्वा मोहनीरूपं कृत्वा स्मररिपुमपि क्षोभंप्रो हं अनेन जगन्मोहनकर्तृत्वं ना
राकस्य श्रीमहादेवस्यैतन्मोहकत्वमुक्तं स्मरोपि महतां मुनीनां पराशरप्रभृतीनामप्यन्तः प्रभवति मनसि प्रभुत्वेन वर्त्तते ता

हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं पुरा नारीभूत्वा स्मररिपुमपि क्षोभमनयत्
स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनीनामप्यन्तः प्रभवति हि मोहाय महतां ५

हेतु

नपि मोहयतीत्यर्थः तत्तु त्वां नत्वेति कथंभूतः स्मरः रतिनयनलेह्येन वपुषोपलक्षितः रतिः कामस्त्री तस्यां नयनयोः लेह्येन साद
रालोकनविषयेणेत्यर्थः अथवा रतिः स्त्र्यादिदर्शनजन्यं सुखं न घ्नके नयने रतिनयने ताभ्यां लेह्यं सादरं दृश्यं स्त्र्यादि शरीरं
तेन करणेन सुंदरं स्त्र्यादिवपुर्द्दृष्ट्वा सर्वोऽपि लोको मुह्यतीति प्रसिद्धमेव ५ रम ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वो क्रमेव विशदयन्स्तौति धनुरिति   हे हिमगिरिसुते यद्यपि तादृक्सहायसंपत्तिर्नास्ति तथापि ते तव कामपि निरूपमां कृपामपाङ्गा
न्नेत्रान्तात् अपाङ्गद्वारा लब्ध्वा इदं प्रत्यक्षं सर्वमपि जगत्प्राणिजातमनङ्गो विजयत इत्यन्वयः एकः केवलः स्वत एव सामर्थ्ये चेत्किंसह
यसंहायसंपत्त्येरित्यनङ्गक्रमनङ्ग इति कामस्य तादृक्सहायसंपत्तिमेव दर्शयति मौर्वी ज्या मधुकरमयी मधुकररूपा तादृप्यमय

धनुः पौष्पं मौर्वी मधुकरमयी पंचविशिखा वसंतः सामन्तो मलयमरुदायोधनरथः
तथाऽप्येकः सर्वं हिमगिरिसुते कामपि कृपामपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो वि
जयते ६

ट् पंचविशिखाः पञ्चैव त्यव   धारणं इष्टव्यं। वसंतः सामन्तः सेनापतिः मलयमरुदायोधनरथः संग्रामीकोरथः अत्र पुष्पस्य मृदु
त्वेन मधुकराणां धनुषि सदासत्वेन विशिखानामल्पत्वेन वसन्तस्याऽस्थिरत्वेन शैत्याद्यभावेन मलयमरुतश्चकदाचित्कत्वेन कार
ण्याहमतं इष्टव्यम् विपरीतोऽयं रिति सूत्रेणास्य पदं विजयते इत्यत्र अपाङ्गद्वीनेऽस्यान्नेत्रान्ते तिलकेपि चेति मेदिनीकरः ६

योजको हेतुश्चेति मल्लिनाथकाशिकास्यशाप — आहोपुरुषिका दर्पाद्यास्यात्संभावना
नाम३ — त्मनीत्यमरः२

एवं तावत् श्रीमद्वाग्भवात्मकमहिमानमनुवर्ण्येदानीं तत्तद्योगिध्येयपादपद्मं श्रीमत्कामं वर्णयंस्तद्दर्शनं प्रार्थयते कणदिति पुरमथितुर्महादेवस्य
ऽहो पुरुषिकाऽऽहंकारिकस्वात्मविषयकोत्कर्षप्रत्ययहेतुभूता भवानी नोऽस्माकं पुरस्तादास्तां प्रत्यक्षीभवत्वित्यर्थः पुराणां मथि-
ता पुरमथिता तस्या नच तज्जकाभ्यां कर्तरीति षष्ठीसमासनिषेधः तस्य तन्त्रत्वाद्भवानीं विशिनष्टि कणदित्यादि कणच्छब्दाय

कणत्काञ्चीदामा करिकलभकुम्भस्तननता परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ७

मानं कांचीनां मेखलानां दाम परंपरा यस्याः सा करिकलभः करिशावकस्तस्य कुंभौ मस्तकाग्रौ शोभातद्वत्स्तनौ तयोर्भरो भारो यस्याः सा
कलभकुम्भौ शावकमस्तकपरः परिक्षीणा कृशा परिणतः पूर्णः शरच्चन्द्रस्तद्वद्वदनं यस्याः सा शरत् ... त्यस्य सूचनाय अथ
क्रमेण चतुर्भिः करतलैर्धनुरादीन्दधाना सृणिमङ्कुशं स्त्रीकट्यां मेखला कांची सप्तकी रसना तथेत्यमरः ७ एव

करि — मध्ये कटिप्रदेशे

एवम्
५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं भवान्या आर्य्येत्यानीतस्याः परिरक्षणानन्तरं सुधासिंधोरिति हे हिमगिरिसुते धन्याः प्राचीनानेकजन्मोपार्जितपुण्यपुञ्जस्तं तःकारणैस्तेचकतिचन कतिपयास्त्वां भजन्ति सेवन्ते ध्यायन्तीत्यर्थः भवानीं विशिनष्टि सुधासिंधोर्म्मध्ये तत्रापि चिन्तामणिगृहे तत्रापि मंचे स्थिता योयः परमशिवपर्य्यंकस्तस्य रूपः सदाशिवः स निलय आश्रयो यस्यास्तां अत्र मध्यस्थले वसादिसप्तम्यंतपदचतुष्टयं अधिकरणं दृष्टव्यं सुधाऽमृतं तस्य सिंधुः क्षीरसागरस्तस्य मध्ये मणिद्वीपे विशिनष्टि सुरेति सुरविटपिनः कल्पवृक्षाः तेषां वाटीउपवनं तया परिवृते परितः आच्छादिते चिन्तामणिगृहं विशिनष्टि नीपेति नीपानामुपवनं नीपोपवनं तद्विद्यते यस्मिन् तन्नीपोपवनवत् अस्मिन्नयं नित्ययोगे मतुप्प्रयोगः अन्यथा बहुव्रीहिणैव नीपोपवनारमस्य धर

सुधासिंधोर्म्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे शिवा
कारे मंचे परमशिवपर्य्यंकनिलयां भजंति त्वां धन्याः कतिचन चिदानन्दलहरीं ८ टम:

त्ताभे मनुष्यो वैयर्थ्यं स्यात् चिंतामणिभिर्निर्म्मितं गृहं चिंतामणिगृहं तस्मिन् मंच उपवेशनस्थाने तद्विशिनष्टि शिवाकारे द्रुहिणहरिमहेश्वर मयत्वान्मंगलरूपे ध्येयस्य भवानीस्वरूपस्यानन्तरूपतामाह चिदिति चित्साक्षादानन्दश्चिदानन्दो ब्रह्मानन्दस्य लहरीव लहरी तां लहरीमाहेना त्वैवं ध्वनितं यथा समुद्रलहरी भिन्नत्वेन प्रतीयमानापि ततो भिन्ना न भवति ब्र तद्वज्जलमयत्वात् तथा चिदानन्दसमुद्रान्निभिन्नत्वेन प्रतीयमाना भवानी परमार्थतो न भिन्ना किंतु ब्रह्मैव अथवा चित्तेःस्रग्भुजन्यानि ज्ञानानि आनंदं विषयसुखानि तेषां परम्परा यस्याः सा तां प क्षे चिद्रूपा साक्षात् अन्तःकरणवृत्तिरानंदास्तद्भिजन्यानि सुखानि तेषां यस्याः सा तां ८ रमरमरमरमरमरमरमरमरमरमरम

लहरी लहरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमंतरंगपूजामाह ॥ महीमिति ॥ हे हिमगिरिसुते त्वं सकलं कुलपथं कुलं षट्चक्रस्थमह्यादिसमूहः पंथा इव कुलपथं भित्वा तुच्छे ण सहस्रारे सह
स्रदलेपद्मे रहसि अन्यागम्ये गत्वा सती पत्या अविहृते चैतन्येन शिवाख्येन सह विहरसि ॥ मसे कुलपथमेवाह महीमिति मूलाधारे आधारचक्रे
वापद्मे स्थितां महीं मणिपूरे चक्रे कं जलं स्वाधिष्ठाने नाभौ स्थितं हुतवहं हृदि अनाहतचक्रे स्थितं मरुतं उपरि तदुपरि कंठे विशुद्धिचक्रे आ
काशं भ्रूमध्ये आज्ञाचक्रे मनः भित्वेति सर्वत्र संबध्यते आकुलपथमिति पाठे आकुलपथं विषमपथं अपवर्गः आप्तिसाधो मुक्तिपदं क्रम

महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि
मनोःपि भ्रूमध्ये सकलमपि भित्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसि ९

मुक्तिपदं स्वतंत्र ज्ञानिनस्तु इहैव समवलीयंते इति श्रुतिप्रामाण्यात् हि हे तु मुक्ता भवंति ये च सगुणब्रह्मोपासकास्ते ब्रह्मलोकं गच्छंतो मध्ये आव
रणं भित्वा ब्रह्मलोकं प्राप्नुवंति एवं देहेपि मध्ये आवरणं भित्वा योगिनः सहस्रारे पद्मे वर्तमानं ब्रह्म प्राप्नुवंतीति दर्शयितुं प्रवाल्याः षट्च
क्रभेदनं एवं कपतिसहितां मणकथनं नतु तस्याः षट्चक्रभेदनहेतुकमेवं स्वात्मारमणं नित्यशुद्धबुद्धमुक्तस्वरूपत्वात्तस्याः ज्ञेतेति पावेस्

नास्यसागाउक्रामंभि

सौंदर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दरनी कुलकुलिनीशक्तिरूपाया भवान्या ध्यानमहिमसुधे ति हे हिमगिरिसुते त्वं कुलकुण्डे स्वपिषी स्वनवयः कुंडली लीयते अस्मिन्नवत्स्मिन्निति कु
लं मूलाधारचक्रं तत्कुंडमिवेति कुलकुंडं तस्मिन् किं कृत्वा स्वां भूमिं मूलाधारमवाप्य तत्र स्वमात्मानं स्वकीयं देहं भुजगनिभं भुजगसदृशं कृ
त्वा पुनरात्मानं विशिनष्टि अध्युष्टवलयं अध्युष्टं सार्द्धत्रितसंख्यावाचको लोके अद्भुव इति प्रसिद्धः अध्युष्टं वलयं मंडलं यस्य तं किं

सुधाधारासारैश्चरणकमलान्तर्विगलितैः प्रपंचं सिंचन्ती पुनरपि रसाम्नायमहसा
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कु

धा

कुर्वंती सुधाधारासारैः सुधाधाराः आसाराः धारावर्षपाताः इव तैः प्रपंचं सिंचंती देहं जीवयन्ती कथंभूतैः चरणकमलयोरंतर्मध्यं तस्माद्विगलि
तैः पुनरपि पुनर्वारं निरंतरमित्यर्थः रसाम्नायमहसा रसाम्नायश्च महश्च तयोः समाहारो रसाम्नायमहस्तेन अत्रोपलक्षणेन नीयाः रसाम्नायः
स्वरूपमुक्तं महश्चस्वचैतन्यम् १०

श्रीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं भवानीध्यानमुक्त्वा तस्याः पीठपर्यायं चक्रमाह चतुर्भिरिति हे हिमगिरिसुते तव भवनकोणाः पञ्चपीठकोणास्त्रयश्चत्वारिंशत्संख्याकाः प
रिणताः परिणामं प्राप्ताः स्थिताः भवन्तीति शेषः कथंभूता भवनकोणाः वसुदलमष्टदलं कमलं कलाश्रं कलादलमश्रं कलाश्रं षोडशदलमश्रं क
लाश्रं षोडशदलमश्रं कलाश्रमिति पाठे एवं व्याख्येयं त्रिवलयानि त्रीणि वलयानि मण्डलानि च तिस्रो रेखास्तिस्रो रेखास्ताभिः सार्द्धं स
हिताः परिणमन्ते तु भूताः शक्तीत्यह मलेति शंभोः श्रीमहादेवस्य संबंधिनीभिर्ज्याश्मूलभूताभिः प्रकृतिभिः कथंभूताभिरिति एवं प्रका

॥ चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः
त्रयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयत्रिरेखाभिः सार्द्धं तव भवनकोणाः परिणताः ॥११॥

रेणनवभिर्नवसंख्याकाभिः नवसंख्याप्रकारमेवाह चतुर्भिरिति चतुर्भिः श्रीकंठैः पंचभिरपि पंचभिश्च शिवयुवतिभिरिति कथंभू
ताभिः शिवयुवतिभिः प्रभिन्नाभिर्भिन्नाभिः श्रीकंठैरिति शेषः प्रपन्नाभिरिति पाठे संबंधं प्राप्ताभिः श्रीकंठैरिति शेषः ऊर्ध्वमु
खस्त्रिकोणमंत्रावयवः श्रीकण्ठशब्दवाच्यः अधोमुखत्रिकोणेयं त्रावयवः शिवयुवतिशब्दवाच्यः अपि शब्दः श्राध्यै एतेन समस्तदेवम
यं चक्रमिति सूक्तं भवति ॥

मं

ए घ
७

एवं तावत्तज्जातीयं च मुक्तत्वं तत्रैवं भक्ता भवानीयेति स्मर्तुं सौन्दर्यं वर्णयति त्वदीयमिति द्वाभ्यां हे तुहिनगिरिकन्ये त्वदीयं सौन्दर्यं कवयितुं वर्णयितुं वि
विरंचिप्रभृतयः कवीन्द्राः कविश्रेष्ठाः कथमपि कल्पन्ते समर्था भवन्ति अन्यत्र तादृक्सौन्दर्याभावाद् दृष्टान्ताभावात् कथमपीत्यक्रमः अन्यत्र
तादृक्सौन्दर्याभावमेवाह यदिति यत्सौन्दर्यमालोकाद् दृष्ट्वा औत्सुक्याद् उत्कंठेच्छायाहेतो रमरललना गिरिशसायुज्यपदवीं भवानीस्वरू

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये कवयितुं कवीन्द्राः कल्पन्ते कथमपि विरिंचिप्रभृतयः यदालो
कौत्सुक्यादमरललना यान्ति मनसा तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवी ॥१२॥ एमः

ध्रु का-द्रायणादिभिर १

पं मनसा यान्ति प्राप्नुवन्ति प्राप्तुं मनोरथं कुर्वन्तीत्यर्थः ननु सत्यसंकल्पा देवाः किमिति न प्राप्नुवन्तीति तत्राह तपोभिर्दुष्प्रापां कृच्छ्र लभ्यां सहयुज्य
ते संबध्यते इति सयुक् पार्वतीतस्याभावः सायुज्यं गिरिशेन सायुज्यं गिरिशसायुज्यं तस्य पदवीमाश्रय तुलयितुमिति पाठे तुल्यं कर्तुमित्यर्थः
तपोभिर्दुष्प्रापामित्यत्र पश्यन्तामिति पाठे पश्यन्तामदीक्षितानां अदीक्षिताः प्रकृत इत्यागमात् ॥१२॥ एमन्तामन्ताम एम एम एम एमन्ताम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्याः कनकनिरीक्षणपातमात्रेणैव रूपसौष्ठवरहितोऽपि पुमान् कामिनीभ्यो हृष्यति तस्याः सौन्दर्यं किं वर्णनीयमित्यभिप्रायेणाह नरमिति युवतयस्तरुण
एवंभूतमपि नरं हठात्कामदेववशात् अनुधावन्ति न केवलं हीनरूपमपि प्रगच्छन्तीत्यर्थः ननु किमत्राश्चर्यं तरुणं तरुणमनुधावन्त्येवेत्यत आह व
र्षीयांसं अतिशयेन वृद्धं वर्षीयांसं वृद्धमपीत्यर्थः ननु वृद्धोऽपि सुरूपश्चेत् तर्हि तदनुधावनं संभवेदेवेत्यत आह नयनविरसं नयनयोर्विगतो रसो य
स्मात्तं नयनसुखाजनकं इत्यर्थः अनर्हत्वापि शरीरसौष्ठवः ननु कौतूहलकौशलं चेद्युवत्यनुधावनं भवेदपि तत्राह नर्म्मसु तत्तत्क्रीडासु जडं मन्दं

मक

नरं वर्षीयांसं नयनविरसं नर्म्मसु जडं जवापाङ्गालोके पतितमनुधावन्ति शतशः
गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचया हठात्त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः १२

ननु किमत्र कारणमित्यपेक्षायामाह जवापाङ्गालोके पतितं नवकनकनिरीक्षणविषयमित्यर्थः युवतिविशेषणं शतशोऽनेकशतसंख्याः गल
त्स्खलद्वेणीबन्धः केशबन्धो यासां ताः कुचकलशयोर्विस्रस्तावधःपतिताः सिचयाः सूक्ष्मावरणानि यासां ताः त्रुट्यन्त्यः काञ्च्यो यासां ताः स्त्रियाः
एवं दिति सूत्रेण त्रुट्यतीशब्दस्य पुंवद्भावः दुकूलं क्षौमं एतेनैवंभूतस्यापि नरस्य लङ्किवशाङ्गनामोहनरूपलाभो भवतीत्युक्तं भवति ८
अत एव वदिष्यति सरस्वत्यां लक्ष्याति १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नं

अतः परं श्रीभवान्याः कालासंस्कृहूं स्वरूपं मातृकान्यासं बाह्यं तन्त्रेण हिताविनिर्देशति हिनगिरिस्तुते येम यूषाद्वपापत्तिभिरनाशकृता आसास्तेषाम एषु पु
रिन्यासं कृतं रत्नवपादांबुजयुगं एजायोग्यं भवतीत्यर्थः अपिसंभावनायां न्यासानेबाह्यहिताविति अत्रेत्यादिशब्दे न तत्त्वक्रमुच्यते। तथाच सप्तपद्मर्थः
स्थितो मूलाधारे अकारादिपंचाशद्वर्णसहितानि ऐं ह्रीं ऐं क्लीं सौः इति बीजानि न्यस्यानि तथा उदके मणिपूरके अकारादिपंचाशद्वर्णसहिते ऐं ऐं इति
वाग्भवबीजे न्यसेत् तथा हुताशे स्वाधिष्ठाने अकारादिपंचाशद्वर्णसहितानि ऐं ह्रीं श्रीं ऐं क्लीं सौं सं हं लं हं सं हं इति बीजानि न्यस्यानि तथा अनिले
अनाहते पंचाशद्वर्णसहितानि यं रं लं वं इति बीजानि न्यस्यानि तथा विपत्ति विशुद्धिचक्रे अकारादिपंचाशद्वर्णसहितानि ऐं ह्रीं बीजसहितानि

क्षितौ षट्पंचाशद्द्विसमधिकपंचाशदुदके हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले दिविद्विः
षट्त्रिंशन्मनसि च चतुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादांबुजयुगं १४ रमःरमः

अकारादिषोडशस्वरूपसहितानि च ऐं ह्रीं सं हं इति बीजानि न्यस्यानि तथा मनसि आज्ञाचक्रे अकारादिपंचाशद्वर्णसहितानि ऐं ह्रीं श्रीं ऐं क्लीं
सौं ऐं ह्रीं श्रीं ऐं क्लीं सौं सं हं इति बीजानि न्यस्यानि कालपसे तेवं योज्यं इतिपृष्ठ षोडशाधिकशतत्रयसंख्याकाय मयूखाम यूखास हस्रा नगरायुः को ष
कलादिरिति सा ते स्थूलशरीरे लिंगशरीर एव प्रभवंति ननु तस्यादांबुजयुगे त्वत्पादांबुजयुगं तु तेषामप्युपरि विराजते इत्यर्थः षष्ठ्यधिकशतत्र
र्या यसंख्येयाहषद्विशदिनैवमादि स्थूलशरीरमाह क्षिताविन्यादिना दिवीतिपर्यंतेन लिंगशरीरमाह मनसीति मनःशब्दे उपलक्षकत्वे स्थाप
चरणानां कारणे न कार्यं लक्ष्यत इति क्षित्यादिशब्देन स्थूलं शरीरं लक्ष्यते केचित्तु भवानीचरणपूजाचरणे निरता क्षित्यादिषट्चक्रेषु स्थि
ताः यास्तादेवतास्ता एव रश्मिशब्देन कथ्यंते इत्यादिरितिसचप्रकारः आगमाद्विस्तरभयान्नात्र व्याख्यायत इति १४ रमः रम

दोत्रप्र:१ र्

इत्यानीश्रीभवान्याः सर्वविद्याप्रदं सारस्वतीस्वरूपं वर्णयंस्तद्ध्यानं महाफलं कैमुत्यन्यायेनाह शरदिति हे तुहिनगिरिकन्ये त्वां न त्वा सतां नित्यं तां पु
रुषाणां भणितयो वाचो न सन्निदधते न सन्निहिता भवन्ति न स्फुरंतीत्यर्थः। अपि तु सन्निदधत एवेत्यर्थः भणितीर्विशिनष्टि मधि
ति मधुक्षीरद्राक्षाणां मधुरिमा माधुर्यं धुरि तेषु धुरीणा श्रेष्ठा इत्यर्थः भवानीं विशिनष्टि शरदि ज्योत्स्नाः शुभ्रकिरणास्तद्वच्छुभ्रां।
शशिनायुतं जटाजूटे केशपाशे मुकुटं यस्यास्तां वरश्च त्रासत्राणं च स्फटिकगुटिका च पुस्तकं च करेषु यस्यास्ताम् त्रासात् त्राणं त्रासत्रा

शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां वरत्रासत्राणस्फटिकगुटिकापुस्तककरां
सकृन्न त्वा नत्वा कथमपि सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः १५

नादशी १ णं स्फटिकस्य गुटिका विद्यते यस्याः सम्मालां ननु चिरं तरं क्रियामाणानमनक्रियैवं विधं फलमुत्पादयेदिति किं मत्राश्चर्यं तत्राह सकृत् १
वारमेकमपि त्रिमं नमोऽनत्तु भक्तिमिश्रं अपितु देवतात्वेन वचनादुद्दानक्तिसहितं नमनमेवं फलं जनयेदिति किमत्राश्चर्यं तत्राह कथ
मपि ताद्दृग्ध्यानारहितमपि नमनं मधुरसादौ भावे भूत्वा प्रत्यये मधुरिमेति रूपं वहतीत्यर्थं धुरं प्राप्ता इत्येवं प्रत्यये धुरीण
इति रूपं यत्र नमनमात्रेणैवं विधानेकगुणविशिष्टवाग्विलासोदयस्तस्या ध्याने महाफलमिति किमु वक्तव्यं इति भावः राम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पा२ गर२

इत्थं भवानीभजनस्य मोक्षफलत्वे ऽपि महाकविवाल्मीक्याद्याह्लादकं वाग्विलासमानुषङ्गिकं फलमाह कवीन्द्राणामिति हे भवानि ये सन्तोऽरु
णामेवारुणवर्णामेव भवतीं भजन्ते ते ऽपि भक्ताः सन्तो व्यासवाल्मीकिप्रभृतीनामपि रञ्जनमाह्लादं वाग्भिर्विदधति वाचामाह्लादकत्वे हेतु
माह विरिञ्चेः प्रेयस्या अतिप्रियायाः सरस्वत्यास्तरुणतरा ये शृंगाररा उपमाद्यलंकारप्रसादमाधुर्यादयस्ते थां लहरीपरंपरा तया ग

न धि

कवीन्द्राणां चेतःकमलवनबालातपरुचिं भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम्
विरिञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरीगभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी १६

भीराभिरगाधाभिः प्रचुराभिरित्यर्थः भवानी विशिनष्टि कवीन्द्राणां चेतांसि कमलीनीव चेतः कमलानि चेतस्कमलानां वनं सर
स्तस्य बालातपवद्रुचिर्यस्यास्तां कतिचिन्न तु सर्वे अतः सर्वं परित्यज्य त्वमेव भजनीयां भुक्तिमुक्तिहेतुत्वादिति भावः १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानीं पद्यानेन व्याख्यादि वन्माल काव्यानां कर्तृत्वं भवति तद्यानमाह सवित्रीभिरिति हे जननि वशिन्याद्याभिर्वाग्देवताभिः सह यस्त्वां संचिं
तयति ध्यायति स वचोभिः कवितैः काव्यानां कर्त्ता भवति कथं भूतैर्वचोभिर्भङ्गिभीरचनाविशेषैः सुभगैः सुदरैः वाग्देवीवदनकमलामोद इ
इव मधुराणि आह्लादकानि तैः वचोभिरिति तृतीयोपलक्षणे महत्त्वं स्मरहितत्वं सति बहुगुणविशिष्टानां वशिन्याद्यासां

सवित्रीभिर्वाचां शशिमणिशिलाभङ्गिरुचिभिर्वशिन्याद्याभिस्त्वां सह जननि संचिंतयति यः
स कर्त्ता काव्यानां भवति महतां भङ्गिसुभगैर्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः १७

ताभिः॥ वाग्देवताभवच्छिन्नहि सवित्रीभिर्वाचां वाणीनां जनयित्रीभिः कर्तृकर्मणोः कृतीति कर्मणि षष्ठी शशिमणिशिला चन्द्र
कान्तमणिशिलास्तासां भंगयः रचंगनितासां रुचिरिव रुचि [redacted] यासांताभिः १७ रामरामरामरामरामरामरामरामरा

उत्पादिकाभिः

राम
१०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्पत्य देवांगनाः

दृष्टान्तीसकलगीर्वाणगणिकावशीकरणं श्रीभवानीध्यानमाह ननुछायाभिरिति हे जननी तेनवतनोः श्रीमन्तैः छायाभिः कान्तिभिः स
र्वोदिवं सर्वां चो हीमरुत्लिमनिमग्नां यः स्मरति ध्यायति अस्य ध्यातुः वैष्णा सहगीर्वाणगणिकाः कतिकतिनवश्या भवंति अपितु
सर्वाएववश्या भवंतीत्यर्थः कान्तीर्विशिनष्टि नरुणेति सूर्य्यशोभायाः सोपानरूपाभिरित्यर्थः अरुणायाभावोऽरुणिमा अरु

ननुछायाभिस्तेतरुणतरणिश्रीसरणिभिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः कतिकति न गीर्वाणगणि
का १८

णिम निमग्नाः अरुणिमनिमग्नानां यद्वा अरुणिमनिमग्नामितिपदद्वयं ननुछायाभिरिति हे तौ न तीयाएतद्नुक्रम अरुणिमनि
मज्जनं घाबाघथिव्योतितितिं त्रस्यद्वनहरिणानामिव शालीने अधृष्टे नयने यासां ताः १८ राम राम राम राम रामाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रयाणां लोकानां समाहारस्त्रिलोकी तामपि इ

का१

इदानीं श्रीभगवत्याः अर्द्धनारीश्वररूपध्यानं दर्शयंस्तत्फलमपि दर्शयति हे हरमहिषि यो भक्तस्ते नवमन्मथकलां ध्यायेत् मन्मथः कामस्तस्य
कलेव कला रतिस्तद्रूपां त्वां ध्यायेदित्यर्थः स सपदि सद्य एव वनिताः सर्वाः स्त्रियः संक्षोभं नयतीत्य तिलघु अनायासेनैतत् त्रि
लोकीमपि मोहयति वशीकरोतीत्यर्थः मन्मथकलां विशिनष्टि रवीन्दुस्तनयुगां यस्यास्तां ध्यानविशेषणे आह मुखमिति मुखं कुचाग्र
बिंदुं कृत्वा चिन्तयित्वेत्यर्थः तस्य बिन्दोरधः कुचयुगं च चिन्तयित्वा बिन्दुं विशिनष्टि हरार्द्धं तदधस्तो विभक्तः हरस्यार्द्धो हरार्द्धस्तं अर्द्ध

मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्द्धं ध्यायेद्यो हरमहिषि ते मन्मथकलां स स
द्यः संक्षोभं नयति वनिता इत्यति लघु त्रिलोकीमप्याशु भ्रमयति रविन्दुस्तनयुगां १९

शब्दस्य नपुंसकलिंगत्वे अर्द्धं नपुंसकमिति समासे अर्द्धं हरस्येति स्यात् तदर्थः पुंलिंगोऽप्यर्द्धशब्दः कुचयुगबिंदोरर्द्धं तत्र वलीनेन सह हिम
गिरिप्रत्यंगं हरार्द्धरूपं दर्शितं भवति एतेन परस्परं रमणात्मकमर्द्धनारीश्वररूपं ध्येयमुक्तं भवति तदधः इति पाठे तस्य कुचयुगस्याधश्च
र्योः कृप्रदेशस्तं च चिन्तयित्वेति शेषः आत्मिन्यत्वे हरार्द्धमिति मुखादीनां त्रयाणां विशेषणं मुखादि ध्यानपूर्वकं मन्मथकला
ध्यानं यः करोति तस्यैव त्रैलोक्यं वश्यं भवतीति संक्षेपः हरार्द्धमिति पाठे एकाक्षर कामकला मंत्रोद्धारः १९ रामराम रम

प्याभ्रूशीघ्रं१ का१ हारो ११

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं भवान्या मूर्त्तिभेदं ध्यानं दर्शयन् फलं च सर्वदर्पज्वरोपशमनरूपमाह किरन्तीति हे हरमहिषि यस्त्वां हृदि आधत्ते ध्याने न स्थापयति स सर्पाणां दर्पमहङ्कारं शमयति ज्वरप्लुष्टं च ज्वरैर्दग्धं च दृष्ट्या सुखयति भवानीं विशिनष्टि हिमप्रभुर्हिमगिरिः हिमगिरिः हिमगिरेः शिलायां मूर्त्तिस्तामिव तत्सदृशीमित्यर्थः अङ्गेभ्यो हस्तपादादिभ्यः किरणनिकुरुं वाऽमृतरसं किरणसमूहममृतरसमिव किरन्तीं विक्षिपन्तीं सर्वदर्पोपशमने दृष्टान्तः शकुन्ताधिपः पक्षीन्द्रो गरुड इव गुरुडस्य यथा सर्पाव

किरन्तीमङ्गेभ्यः किरणनिकुरुं वाऽमृतरसं हृदि त्वामाधत्ते हिमगिरिशिलामूर्त्तिमिव यः
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव ज्वरप्लुष्टं दृष्ट्या सुखयति सुधाधारशिरया २०

दृष्टान्तस्त्वेवंविधस्य तव ध्यातुरपीत्यर्थः सुधाधारश्चन्द्रस्तद्दृष्ट्येव या सुखदयेति दृष्टिविशेषणं सुधाधारशिरयेति पाठे सुधाया धारा यस्यां सा सुधाधारा चासौ शिरा चेति तया अमृतस्राविनाड्या इत्यर्थः यद्वा सुधाया आधारः सुधाधारः स चासौ शिरा चेति तयेत्यर्थः दर्पकः सर्पाणामपहन्तेति ॥ वि॰ इति मेदिनीकरः २० श्रीरामकृष्णायनमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं तत्तत्स्थानं तत्तत्कलेवास्मि ध्यायेदानीं परमयोगीश्वरवंदितपादपद्मां स्तुवन्निरन्तरं तदनुसंधानफलमाह तडित्त्वेत्वेति हे जननि तव कलां महान्तिमहान्तः सनकादयः पश्यंतो निरंतरमनुसंदधानाः सन्तः परमाह्लादलहरीं निर्मलब्रह्मसुखपरम्परां दधति हृदि धारयन्तीत्यर्थः दर्शनेकारणमाह मनसेति तस्या योग्यतामाह मृदित [redacted] मलमायेनेमृते नाशिते मलमायेयस्य तेनाऽमलं कार्यं॥ मायातन्मलन्मता

तडित्त्वेत्वा तन्वीं तपनशशिवैश्वानरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलां
महापद्माटव्यां मृदितमलमायेन मनसा महान्तः पश्यंतो दधति परमाह्लादलहरीं॥२१॥

३ विधा ऽथवा माया वंचना॥ कलां विशिनष्टि महापद्माटव्यां पानिषट्कमलानि तेषामप्युपरि सहस्रारे कमले निषण्णामुपविष्टां तडित्त्वे त्वा तन्वीं विद्युद्रेखासूक्ष्मां तपनशशिवैश्वानरमयीं॥ त्रिनेत्रत्वात्॥ महान्ति च तानि पद्मानि च महापद्मानि महापद्मानामटवी वमहापद्माटवी तस्यां॥ महत्वं चैषां स्वस्वारोहणद्वारा महापदप्राप्तिहेतुत्वात्॥ ऽथवा महती चासौ पद्माटवी च महा [illegible]: १९

एम
१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल

इदानीं भवान्याः परमकारुणिकत्वेन परमोदारतां स्तवीति श्रीशंकरो भवानीति। हे भवानि यः कश्चिद्भक्तो यदैव इति त्वां स्तो
तुं वाञ्छन् भवानि त्वमित्येव कथयति तदैव त्वं तस्मै भक्ताय दिशसि ददासि निजसायुज्यपदवीं निजं सांनिध्यं। इति शब्दो
क्त्या स्तुतिमेवाह हे भवानि त्वं दासे मयि सकरुणां दृष्टिं वितर देहीति निजसायुज्यपदवीं विशिनष्टि मुकुंदब्रह्मेन्द्रैः

भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वाञ्छन्कथयति भवानि त्वमिति यः
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मकुंदब्रह्मेन्द्रस्फुरमुकुरनीराजितपदां २२

प

स्फुरन्मुकुटैर्नीराजिते पदे यस्यां तां मयि वितरेति सप्तमी अधिकरणत्वविवक्षया। यदैव स्तोतुं प्रवृत्तमात्रायैव च तस्मान्नि
ष्ठां प्रयच्छति भगवती तदा किमु वक्तव्यं शमदमविशिष्टाय निरन्तरं तामेव सेवमानाय स्वस्वान्निष्ठां प्रयच्छतीति भावः॥२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इत्नीसदाशिवस्यवशीकरणंश्रीभवान्याःस्वरूपमाश्चर्यंवहुर्लभंयद्विषयंतर्कमाह॥त्वयेतिहेजननित्वयाशंभोर्वामांगंवपुर्हृ
त्वाशंभोरितिहृत्वैवापरमपिशरीरार्द्धंशंभोःस्वेच्छयैवहृतमभूदितिशंकेतर्कयामिशरीरार्द्धमित्यत्रनषष्ठीसमासःकिंतुशरीरेअ
र्द्धंशरीरार्द्धमितिसप्तमीसमासःसप्तमीतियोगविभागात्समासः।यद्वावामंसुंदरंशरीरार्द्धंहृत्वाअपरमप्यर्द्धंवपुर्हृतमभूदि
त्यहंशङ्केइत्यन्वयःकथंभूतस्यशंभोःअपरितृप्तेनसदाभवान्याःअतिकामेनमनसोपलक्षितस्य।अथवाश्रीसदाशिवशरीरस्या
नन्दमयत्वादतृप्तमपरितृप्तेनालंबुद्धिरहितेनमनसेतिभवानीसंबंधेनयोज्यं।हरणशंकाहेतुमाहतथाहीतितथाहीतियदेतत्त्व

त्वयाहृत्वावामंवपुरपरितृप्तेनमनसा शरीरार्द्धंशंभोरपरमपि शङ्के हृतमभूत् तथाहि
त्वद्रूपंसकलमरुणाभंत्रिनयनंकुचाभ्यामानम्रंकुटिलशशिचूडालमुकुटं २३

निदर्शने।अयंहेभवानिसकलंकलाभ्यांपूर्णाभ्यांसहवर्त्ततइतिसकलं॥अर्द्धनारीश्वररूपविशेषंतद्रूपंतथैवरूपमिवभातीति
शेषः॥तत्रहेतुरहणाभमरुणाभाकान्तिर्यस्यतत्॥कुचाभ्यामानम्रमानतं॥स्तनाविघतेआधारत्वेनयस्यतत्चूडालंतच्च
तन्मकुटंच कुटिलशशिनायुक्तंचूडालमुकुटंपत्रार्द्धनारीश्वररूपेणतत्।अत्रापित्रिनयनत्वकुटिलशशिचूडालमुकु
टत्वयोर्भवानीस्वरूपत्वज्ञानेसाधकत्वासंभवतितथाप्यारुणासंबंधेनतयोर्गमकत्वंसंभवतीतिपुंस्त्वमुक्तंशङ्केहृतमिति॥२१

राम
१३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं पूर्वोक्तमेव हरिहरविरिंचीनां भवान्याधीनत्वं सृष्ट्यादिकर्तृत्वमनुवदन् विश्वतश्चेतन्यस्याऽपि ब्रह्माद्यनुग्राहकत्वं त्वदधी
नमेवेत्याह। जगत्सृतेर्हेति। धाता ब्रह्मा जगत्सृते सृजति। हरिरवति रक्षति। रुद्रः क्षपयते हरी करोति नाशयतीत्यर्थः॥
एतज्जगत्तिरस्कुर्वन् स्वमपि वपुरीशो रुद्रस्तिरयते अन्तर्दधाति। तदिदं सर्वं ब्रह्मादि शिवः परमात्मा सदा सर्वदा कालत्र
येऽपि अनुगृह्णाति तत्तच्छक्तिदानेन रूपयति किं कृत्वा हे जननि तव भ्रूलतिकयोः भ्रूवौ लतिके इव भ्रूलतिके तयो

जगत्सृते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयते स
दापूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः २५

राज्ञामालंब्याश्रित्य। क्षणमवलितयोः क्षणमात्रं विजृंभितयोः। शिवं विशिनष्टि पूर्वः सर्वादिः। यद्वा सदाशब्दः पूर्वो यत्र
स सदापूर्वः शिव सदाशिव इत्यर्थः परमात्मेत्यर्थः एतेन सजातीयविजातीयस्वगतभेदशून्यस्य सर्वानुग्राहकस्य सदा
शिवस्याऽपि त्वदधीनाऽनंतशक्तिकृतेति दर्शितं भवति। इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेः॥२५॥ ॥ ॥ ॥॥

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं तावत्सर्वानुग्राहकत्वमुक्तं श्रीभवान्याः अतः परं सर्वोपादानत्वात्सैव पूज्या तथा च सतीतरदेवपूजापि स्यादित्यभिप्रायेणाह
त्रयाणामिति हे त्रिनयने तव चरणयोर्भक्त्या या विरचिता पूजा सा पूजा त्रयाणां देवानामपि भवेत्संभवेत्। तत्र हेतुगर्भविशेष
णमाह। त्रिगुणेति। त्रयाणां गुणानां समाहारः। त्रिगुणं त्रिगुणेन सत्त्वरजस्तमसा जनितानां उत्पादितानां। त्रिनयनइति
संबोधनेन सूर्याग्निचंद्रमयत्वेन भवान्याः अग्नीषोमात्मकजगन्मयत्वमुक्तं। एतेन भवान्याः सकलदेवमयत्वेन तत्पूज
नेन ब्रह्मादिदेवपूजनं भवतीदं हेमकलसेकेन शाखादिसेकवदिति सूचितं भवति तदेवाह तथाहीति। पादावुद्वहतीति

त्रयाणां देवानां त्रिगुणजनितानां त्रिनयने भवेत्पूजा पूजा तव चरणयोर्या विरचिता तथा
हि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः २५

पादोद्वहनं तव पादोद्वहनं त्वत्पादोद्वहनं तद्वहनमणिपीठं च तस्य निकटे एते ब्रह्मादयः स्थिताः शश्वन्निरंतरं हि शब्दः आ
आगमप्रसिद्धमाह। ब्रह्मादिविशिष्टमुकुलिताश्च ते कराश्च मुकुलितकराः तेऽत्तंसा इव मुकुलितकरोत्तंसास्तैर्मुकु
टभूषितेषां ते तथा। एतेन भवान्याः परमसेव्यत्वेन ब्रह्मादीनां सेवकत्वेन च भवान्याः पूजया ब्रह्मादिसेवकानामपि पूजा भव
नापि तिराजपूजया भृत्यपूजावदिति सूचितं ॥२५॥

राम १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमुना भवान्याः परमपतिव्रत्यमहिमानमनुवर्णयन् श्रीसदाशिवस्य महाप्रलयेपि क्रीडामाह॥ विरिञ्चिरिति॥ यस्मिन्महासंहा
रे महाप्रलये विरिञ्च्यादयोः पिपंचत्वादिकं गच्छंति अस्मिन्महासंहारे सति परमपतिव्रतेन त्वत्पतिर्विलसति विशेषेण क्रीडति ध्या
ने वुद्धौ सन्निधाप्याहासा वितिलस श्लेष क्रीडनयोरिति धातुः विरिञ्च्यादिपंचत्वादिकमाह विरिञ्चिः पंचत्वं व्रजति प्रा

विरिञ्चिः पंचत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनं
वितंद्रा माहेन्द्री विततिरपि सम्मीलति दृशां महासंहारेऽस्मिन् विलसति त्वत्पतिरसौ २६
सति

प्नोति विरतिं संसारपालनव्यापारोपरमं। कीनाशो यमः। माहेन्द्री महेन्द्रसंबंधिनी दृशां दृष्टीनां विततिः परंपराऽपि संमील
ति मुद्रिता भवति विगतातंद्राय स्याः सा वितंद्रा विगतनिद्रेत्यर्थः एतेन श्रीभवानीपातिव्रत्यनिबंधनमेव श्रीमहादेव
स्य महाप्रलयेऽवस्थानमिति दर्शितं कीनाशः कर्षक क्षुद्रे पांशुलाति पुष्पावान्यवत्। यमेनेति मेदिनीकरः २६॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि

इदानींसर्वस्यापिस्वचेष्टितस्यभवानीपरतेनतत्पूजाप्रकारतांप्रार्थयते।हेजननियदिदंसकलंमेविलसितंविविधंचेष्टितंतदात्मार्प-
णदृशाभक्तानांतवसपर्यापर्यायःपूजाक्रमोभवतु॥आत्मनिपरमात्मनिअर्प्यतेसमर्प्यतइत्यात्मार्पणमात्मार्पणदृशा।अवस्था-
यद्वाआत्मनिअर्पणंसमर्पणंतेनदशाप्रदीपवर्त्तिस्तद्वद्भ्रमाणमित्यर्थः।तथाचगीतायांभगवद्वाक्यंयत्करोषीत्या-
दिविलसितस्यस्वरूपतमेवाह।जपइति।जल्पोभाषणंउच्चैरुपांशुर्मानसश्चेतित्रिविधोमंत्रोच्चारणरूपोजपःशिल्पं

जपोजल्पःशिल्पंसकलमपिमुद्राविरचनंगतिःप्रादक्षिण्यक्रमणमदनाद्याहुतिविधिः
प्रणामःसंवेसःसकलमिदमात्मार्पणदृशासपर्यापर्यायस्तवभवतुयन्मेविलसितं २७

य

कर्म्मकौशलंमुद्राविरचनंपाणपप्रसिद्धगुह्यमुद्रादिविरचनंगतिर्गमनक्रियामात्रंप्रदक्षिणस्यभावःप्रादक्षिण्यंप्रादक्षिण्ये-
नक्रमणंपादप्रक्षेपःप्रदक्षिणक्रियेत्यर्थः।अदनंभक्षणमादिर्यस्यतदद्नादि।आहुतिविधिराहुतीनांप्रक्षेपरूपाक्रि-
यायागःसंवेशःशयनं।अत्रजल्पादीनांजपादिरूपताविवेषासाचात्मार्पणक्रिययाभवति।सर्वंहिपरमात्मोद्देशेनक्रि-
यमाणंतदाराधनंभवतिपरमात्माचभवानीत्यवोचामएवंविधिनेहप्रमत्मने आत्मार्पणदृष्टेतिसुगमोपायः।दशाव-
स्थादीपवर्त्योर्वस्त्रांशेस्त्रियामितीतिमेदिनीकरः २७ राम

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शि॰ ३

एवंतावत्स्थूलदेहव्यापारमात्रस्य भवानीत्वं जाप्रकारतां प्रार्थ्येदानीं लिंगशरीराधिष्ठातुः स्वात्मनोऽपि भवानीचरणषट्पदेया
कारतां प्रार्थयते॥ ददान इति॥ हे जननि मज्जीवो ममात्मा तव चरणे षड्चरणतां भ्रमररूपतां प्राप्नोतु प्राप्नोतु। भ्रमररूपतामेव नाम
तोऽर्थतश्च वदन्स्वात्मानं विशिनष्टि करणेति पंचज्ञानेन्द्रियाणि षष्ठं मनश्च तानि चरणानीवा तत्तद्विषयप्राप्तिहेतुत्वा॥
त्तैः सह निमज्जन्नवहिरूपरतव्यापारो भूत्वा चरण एव तिष्ठन्नित्यर्थः। मज्जीव इत्यत्र चैतन्यस्वरूपं राहोः शिर इतिवच
भेदमारोप्य षष्ठीसमासो द्रष्टव्यः॥ यथा भ्रमरो नानागंधरसलोभेन नानापुष्पेषु परिभ्रमन् क्वापि न गंधरसलोभेन

ददाने दीनेभ्यः श्रियमनिशमाशानसदृशीममंदं सौंदर्यं स्तवकमकरंदं विकिरति तवा
स्मिन्मंदारस्तवकसुभगे यातु चरणे निमज्जन्मज्जीवः करणचरणैः षड्चरणतां २८

फल एव तिष्ठति तथा संसारे ... षु परिभ्रमन् परिश्रान्तो मज्जीवस्तव चरण एव तिष्ठत्वित्यर्थः चरणस्य परमवदान्य
तां हृदयन्नाह इति ददान इति दीनेभ्यः सकामभक्तेभ्य इत्यर्थः। अनिशमिति दानाविच्छेदमाह॥ श्रियं विशिनष्टि
आशानसदृशीमीश्वरस्य स्वसंपत्त्यनुसारेण दातुमुचितामित्यर्थः॥ मुक्तिहेतुत्वेनापि चरणं विशिनष्टि अमंदमलहं
यथा स्यात्तथा सौंदर्यमेव कदैव सौंदर्यं तत्स्य मकरंदमिव विषयसुखं विकिरति विशेषेण क्षिपति। एतत्सेवानंदस्वात्मा
नि मग्नतां निमग्नात्मानुपजीवंति इति श्रुतेः। परमसौंदर्यमाह मंदारस्य तव कोमंदारस्तवकस्तद्वत्सुभगे सुंदरे संबोधनपदं

स्तवक २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संप्रति सर्वमङ्गलमपि श्रीसदाशिवस्य कालाः नवंपुनरपि प्रकारांतरेण वदन्नंबिकायाः पातिव्रत्यमहिमानमेव कारणमाह सुधा
मिति। हे जननि शंभोः कालकलना नाम कलघस्मरेण कालेन कलनाग्रसनं नेति यन्नूनं तत्कर्णयामितवताटङ्कमहिमा। त
व ताटङ्कमाहात्म्यनिबंधनं कालाग्रसनमित्यर्थः ताटङ्कमेव जीवनमिति विवरणस्य मांगल्याधिकरणं पतिस्तन्मूलमिति पाठे तस्य का
लाकलनस्य मूलं कारणमिति व्याख्येयं ननु कालस्यापि किं विलिमिन्नपुरस्कारेण ग्रसनं तत्र भावाच्छंभोर्ग्रसने न भ

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं विपद्यंते विश्वे विधिशतमखाद्या दिविषदः
करालं यत्क्ष्वेडं कवलितवतः कालकलना न शंभोस्तन्मूलं तव जननि ताटङ्कमहिमा २८

विष्यतीत्यत आह करालं जगद्भयानकं क्ष्वेडं विषं कवलितवतो भक्षितवतः। कालस्य सकलघस्मरत्वमेवाह सुधाम
मृतमास्वाद्य स्थिता अपि विधिशतमखाद्याः सर्वे विदिषदो देवा विपद्यंते म्रियन्ते कालेनेत्यर्थात् सुधां वि शि
नष्टि प्रतिभयं च जरां च मृत्युं च तान् हरतीति तथा तान् प्रतिभयं सत्तादिभ्यो भयं। नूनं निश्चितेन कर्णस्मरणे वा
कारणइति मेदिनीकरः॥२८॥

राम
१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भवानीविषयां परिजनोक्तिं चातुरीमाह किरीटमिति॥ हे जननि भवस्य तवाभ्युत्थाने तव परिजनोक्तिर्विजयते इत्यन्वयः
भवकर्म्मके त्वत्कर्त्तृके भ्युत्थाने इत्यर्थः तवेति काकाक्षिगोलकन्यायेनो भयत्र संबध्यते॥ एतेषु विरिञ्च्यादिषु
प्रणम्रेषु सत्सु। परिजनोक्तिं चातुरीमेवाह किरीटं वैरिं विरिञ्चिसंबंधि परिहर वारय। कठोरे कर्क्कशे कोटीरे कि

वं

किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटं प्रण-
म्रेष्वेतेषु प्रसभमभियातस्य भवनं भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ३०॥ ॥

भवनं

टीरे स्खलसि स्खलिष्यसि वर्त्तमानसामीप्ये वर्त्तमानवद्वेति भविष्यदर्थे लट्। जहि त्यज त्यागलक्षणकोः अहन्तेः॥
भ्यागने कार्यत्वाद्धातूनां त्यागार्थो वा हन्तिः प्रसभं हठात् भवनं अभियातस्य गतस्येति भवविशेषणं मंडनं वाः यमुकुटं

भ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करीरं पुन्नपुंसकं इत्यमरः ॥ २०॥ इदानीं भवानीशाऽनुविधायिपशुपतिकर्तृकदेवीमाहात्म्यप्रधानागमावतरणमाह। च
तुःषष्ठेति पद्यं तत्र त्वामितद्रा नेन पातीति पशुपतिर्महादेवश्चतुःषष्ट्या चतुर्भिरधिकया षष्ट्या तंत्रैरागमैः स
कलं भुवनमभिसंधायाभिप्रेत्य तत्तत्सिद्धिप्रसवपरंत्रस्तत्रास्सिद्धिनियन्त्रिपरवशः स्थितः पुनः पश्चात्त्वन्नि

चतुःषष्ट्या तंत्रैः सकलमभिसंधाय भुवनं ऽ स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः पुन
स्त्वन्निर्बंधादखिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदम् ३१

र्बंधात्स्वस्येरणाद्धेतोरखिलपुरुषार्थैकघटनास्वतंत्रं समस्तपुरुषार्थानामेको घुर्घटनाघटना तत्र स्वतंत्रमन्यनि
रपेक्षं। ते तंत्रं तव स्वधानमागममवातीतरत् क्षितितलमवतारितवान्। अप्यन्तर्भावितण्यर्थकर्मकत्वात्तृधातोः अतिप्रसिद्ध

महिम्नस्तवटीका। १९

राम
१७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदर्थं समस्तपुरुषार्थसाधनस्य देवीतंत्रस्याहिता वतरणं तस्य श्रीभवानीमंत्रस्योद्धारमाह ॥ शिवइति [redacted] । हे जननी त्व
मी वर्णास्तव नामाः अवयवतो मंत्राः अवयवतो भजन्ते । नाम हि स्वाभिधेयमभिधत्ते न तु मंत्रेह पीति मंत्रोऽपि नामवर्णनं वि
ष्टिनष्टि तिस्र सिद्धैर्लेखाभिर्भवत्रेश्वरी बीजैरवसाने पृष्टेषु घटिताः संयुक्ताः । अद्याह्यो क्तान् वर्णानाह शिवइत्यादि

शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजन्ते वर्णास्ते जननि नामाः अवयवताम्

३२

ना अत्र शिवादिशब्दा अर्थपरा अपि तत्तद्वर्णपरत्वे वयं ह्रेति ताभ्यागमेऽपि तत्र द्यन्तानाहुः शिवो हकारः शक्तिः सका
र कामः ककारः क्षितिर्लकारः । अथ शब्दोऽयं आनंतर्यपरः रविरीकारः । शीतकिरणः सकारः स्मरः पूर्वोक्तमेव शक्रो
को लकारः । तदनु तस्य लकारस्य पश्चात् परा सकारः मारः ककारः हरिः पूर्वोक्तमेव अत्रातिगोप्यत्वात् मंत्रस्यास्य हं न के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री

ष्यतऽइति॥ २०॥ संप्रति द्वर्णोक्तमेव मंत्रं स्मरादिबीजत्रयेण विशिष्टेन कथयन्नधिकारिभेदेन मानसो जपहोमावाह। स्मरमितिः॥ हे नित्ये विनाशरहिते तव मनोः स्वर्णोक्तस्यादौ प्रथमतः स्मरं स्मरबीजं क्लीं योनिं भुवनेश्वरीबीजं ह्रीं लक्ष्मीं श्रीबीजं श्रीं इति त्रितयमिदं निधाय स्थापयित्वा ये ये साधकाः इत्यर्थः॥ एके मुख्या अधिकारिणस्त्वां जपंति त्वदनुसंधानपूर्वकं त्वन्मंत्रं जपंतीत्यर्थः। एकपदे की मुख्यतामाह निरवधिमहाभोगरसिका भोगस्य स्वानुरक्ताऽइत्यर्थः नित्ये इत्यत्र चित्ते इति पाठे चित्ते निधायेति योज्यं॥ चिन्तामिति पाठे त्वयि मनो हस्तिन्निधाये त्यर्थः॥ पुनरप्येकमुख्यत्वे विशेषप्रत्याहारमाह चिन्तामणीति

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोर्निधायैके नित्ये निरवधिमहाभोगरसिकाः जप
न्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वन्तः सुरभिघृतधाराहुतिशतैः २१

उक्तकामितप्रदत्वात्गुणाः परमोदारत्वादयस्तैर्निबद्धानि भवानीचरणे स्थापितानि अक्षवलयानि येस्ते अक्षवलयानीति अक्षाणां वलयसादृश्यमिति निर्मलत्वेन मानसंहोमं वदन्पुनरपि तान्विशिनष्टि शिवाग्नौ शिवोऽग्निः

अक्षवलयानि २

रिव जगद्धोमाधिकरणत्वात्तत्र सुरभिघृतधाराहुतिशतैर्जुह्वन्तो होमं कुर्वन्तऽइत्यर्थः। आर्षोऽयं नुम् समस्तवेददर्शिम्न हादेवाः वृत्तारत्वाद्वा कषितं श्रीशंकराचार्यस्याचतुर्भिः सह शिष्यैस्तुष्टा को रौव [illegible] ष्यतीति कालिकापुराणे भुवो प्रमद्भुज्जुहुर्नीतभुजो मे दास्त्रधिस्त्रियोऽमरः॥ आविर्द्वैवदासिस्पृष्टाविति मेदिनीकरः॥ २१॥ ॥ रामः

१८

मिति ह्रूं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं तावत्सकलदेवसेव्यत्वाद्भवान्याः प्राधान्यमुपपादितं संप्रति भवान्या एव प्राधान्यमुत शङ्करस्यापि उभयोः प्राधान्ये एकमन्त्री
भावात्सृष्ट्यादिकर्तृत्वानुपपत्तेः। अन्यतरोपसर्जनत्वे च समस्तस्फूर्तिस्फुरतीति ह्रासवृद्धिविरोधः। (अत्रापि च पूर्व्वोः पविते
धः) अत्रापि च पूर्व्वोः पविरोधइ तीमां शंकां परिहरन्नेकवाक्यमाह। भवानीशंकरयोः शरीरमिति॥ हे भगवति त्वं शंभोः शरीरं मूर्त्तिः श
शीरं शिशिरं छिशलीच मिहिर अशशिमिहिरं शशिमिहिरं वक्षोरुहयुगं यस्मिंस्तत्॥ भवात्मानं वेदेहेव तवात्मानं तव
मूर्त्तिमन्ये निश्चिनोमि यत एवमतः शेष उपयुक्तेतर उपसर्जनमित्यर्थः। शेषी प्रधानमिति। अयं संबंधो वां युवयोरुभ हेतु ४

शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं तवात्मानं मन्ये भगवति भवात्मानमनघम्। अतः
शेषः शेषीत्ययमुभयसाधारणतया स्थितः संबंधो वां समरसपरानंदपरयोः ३४॥ ॥

यसाधारणतया स्थित उभयस्मिन्सामान्यरूपेण स्थितः परमार्थतः एकस्यैव द्विधा शरीरद्वये परिगृहीते प्रधानोपसर्जन
भावो नास्ति तथापि व्यवहारदशायां कश्चित्प्राधान्यं कश्चिदुपसर्जनत्वं प्रकल्प्य भगवती भवश्च स्तूयते पूज्यते चेत्य
र्थः परमार्थत एकत्वमेवाह समेति[redacted]। सं सम एकस्वाद एकरूपइत्यर्थः। परश्चासावानंदश्च परानंदः समरस
श्चासौ परानंदश्च समरसपरानंदः सपरः केवलोपयोस्तयोः शेषः शंकर्षणेवधे। अनंतनीप्रसादेनसन्निर्म्माल्यापं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न

लेस्मिंयोउपक्लेतरेनस्वीतिमेदिनीकरः॥३४॥भवानींजगतामात्मत्वेनवर्णयन् शिवेनैक्यमाह॥मन स्त्वमिति। अत्रवाध्या
यांसामानाधिकरण्यं।मनआदिरूपत्वेऽपि तिरिक्तंमनआदिनात्मीत्यर्थः॥तदेवाह। त्वयिपरिणतायांसत्यांपरंभिन्नं किं
चिदपिनास्ति। हि यस्मात्। श्रुतिप्रसिद्धिमाह। वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यंइति। त्वमेवअन्यनिरपेक्षा
विश्ववपुषापरिणमयितुंभवस्यान्तरंप्रापयितुंस्वात्मानंशिवयुवतिभावेनैव बिभृषेधारयसि। तत्र हेतुः एवं शिवयुव

मनस्त्वंव्योमत्वंमरुदसिमरुत्सारथिरसित्वमापस्त्वंभूमिस्त्वयिपरिणतायांनहिपरं त्व
मेवस्वात्मानंपरिणमयितुंविश्ववपुषाचिदानंदाकारंशिवयुवतिभावेनबिभृषे ३५

तिभावेनपरमात्ममायास्वरूपेणसृष्ट्यानन्तरंजगत्पालयितुंभवानीशंकरस्वरूपेणस्वात्मानंधारयसीत्यर्थः। परमा
त्मपक्षेशिवः। विकृतंचैतन्यं। युवतिः सर्वदैकरूपत्वात्सर्वान्मोहयितुंसमर्थत्वात्चमाया॥स्वात्मानंविशिनष्टिचिदा
नंदाकारंचिदाभासावानंदश्चचिदानंदः। सआकारः स्वरूपंयस्यतं। परिणामो। अतत्त्वतः। तत्त्वतो। न्यथाभावः सचविवर्तएव श्रम
३५ १९

19

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग

एवंतावत्तविस्तरं श्रीभवानीस्वरूपं निर्द्दिश्येदानीं श्रीमहादेवं प्राधान्येन स्तुवन् भवानीमपि स्तौति तवेत्यादिभिः षड्भिः श्लो
कैस्तत्वाधारे मूल इति पर्यंतैः॥ हे नंदिनि शंभुं महादेवं वंदे स्तौमि नमस्करोमीति वा॥ वदि अभिवादनस्तुत्योः शंभुं विशिन
ष्टि तवात्मावकस्थं। त्वन्निर्मिते आत्माचक्रे स्थितं तवेति षष्ठीसंबंधे। स च संबंधो जन्यजनकभावो वा अथ वा तव शंभुं त
व स्वामिनं शंभुं वंद इति संबंधः॥ स्तुतौ हेतुगर्भं विशेषणमाह परं परमेश्वरं॥ अत एव तपनशशिकोटिद्युतिं धरतीति त

तवात्मावकस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिमिलितपार्श्वं परचिता यमाराध्यः
प्रेम्णा रविशशिशुचीनामविषये निरालोके लोके निवसति सदालोकभवने॥ ३६॥ ॥

थातं॥ पार्वतीसंश्लिष्टतया पुनरपि विशिनष्टि परचिता पार्वत्या परिमिलितः पार्श्वो यस्य तं परिशब्दः संयोगाद्विप्रयोगा
त्ताविति न्यायेन प्राप्तवियोगं व्यवच्छिनत्ति परा प्रकृष्टा चित्स्वरूपं ज्ञानं यस्याः सा परिचिन्तया॥ अथ वा परा वासौ चिच्च पर
चिन्तया॥ यद्वा परा चित् ज्ञा नं यस्याः सा परचिन्तया ज्ञानदात्रेत्यर्थः॥ मोहलदानृतेन पुनरपि शंभुं विशिनष्टि यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि

मिति॥ यं शंभुं प्रेम्णा भक्त्या आराध्य संसेव्य लोको जनो भक्तः सदा लोकभवने वसति॥ सं श्वासा वा लोकश्च सदालोकः
सदालोको भवनमिव सर्वाश्रयत्वात्सदालोकभवनं ब्रह्म तस्मिन् यद्वा सन्तः समीचीना जठराग्नासकाः आलोका येषां ते स
दालोकाः सूर्यादयस्तेषां भवनमाश्रयस्तस्मिन्॥ सूर्याद्याश्रयत्वं ब्रह्मणस्तमेव भान्तमनुभाति सर्वं तस्य भासा स
र्वमिदं विभातीत्येवमादिश्रुतावेव प्रसिद्धं॥ यद्वा सदेति भिन्नं पदं॥ लोकानां चतुर्दशभुवनानां भवनमुत्पत्तिर्य
स्मात्तद्ब्रह्म तस्मिन् लोकानां ब्रह्मणः उत्पत्तिस्तु एतस्मादात्मन इत्येवमादिश्रुतावेव प्रसिद्धा तदा लोकभवनं
विशिनष्टि रविशशिशुचीनाम विषये अप्रकाश्ये शुचिरग्निः। अत एव निरालोके भौतिकालोकशून्ये। निजालो
के लोको निवसति हिमालोकभवन इति पाठे। हिरवधारणार्थः॥ निजश्चासा वा लोकश्चेति निजालोकः स्वरूपचै
तन्यं तस्मिन्॥ आलोकेन सह वर्त्तन्त इति सालोकाः सूर्यादयस्तेषां भवन इवाश्रय इति व्याख्येयं। अथवा सदा
लोकभवनशब्देन कैलाशलोक एव कथ्यते॥ तस्य च सूर्याद्यविषयत्वं युक्तमेवेति॥ ३६॥ ॥ ॥ ॥

राम
२०

20

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आज्ञाचक्रस्थं शिवं स्तुत्वाथ विशुद्धिचक्रस्थं शिवं स्तौति विशुद्धाविति। विशुद्धौ चक्रे स्थितं शिवं देवीं च सेवे भजे शिवं विशिन
ष्टि शुद्धस्फटिकस्वविशदस्तं शिवस्य तत्स्थलत्तणमाह। व्योमजननमाकाशजनकं। व्योमेति उपलत्तणमितरकार्यस्या
तथाच पारमर्षसूत्रे जन्माद्यस्य यत इति। देवीं विशिनष्टि शिवेन समानं व्यवसितं निश्चयो यस्यास्तां एकरूपत्वादुभयोः
देवयोः अंगाङ्गसकत्वमाह ययोरिति। ययोः शिवस्य देव्याश्च कान्त्या स्वस्वरूपप्रकाशेन जगती चतुर्दश भुवनं विलसति
कोमा ५ प्रकाशते। ननु कथं शरीरोत्थं तरवह्निस्थ्यां बहिः स्थितजगती भवनमत आह शशिकिरणानां सारूप्यं सादृश्यं तस्य सर
णिः पद्धतिस्तां यांत्याः प्राप्नुवत्या यथा चन्द्रकिरणानां बाह्यद्वारा गृहाभ्यन्तरं गच्छंति तद्वदिंद्रियद्वारा बहिर्गच्छन्तीत्य

विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजननं शिवं सेवे देवीमपि शिवसमानव्यवसितां ययोः
कान्त्या यान्त्या शशिकिरणसारूप्यसरणिं विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ३७

नजं र्थः देवीकृतत्वं वदन् गतीं विशिनष्टि विधूतमंतर्ध्वान्तं यस्याः ॥ अत्र दृष्टान्तमाह चकोरीवेति चकोरः पक्षिविशेषस्तस्य स्त्री
चकोरी सा हि शशिकिरणानेवाश्रित्य तिष्ठति तद्व्यतिरेकेण च न जीवत्येवं जगती चिज्ज्ञानेनैव भासते तिष्ठति च तद्व्य
तिरेकेण नास्त्येवेत्यभिप्रायः काश्चित्पुनः कवचनं तादृशत्वाज्ञासाभिप्रायेण अत्र कान्तिशब्देनान्तःकरणवृत्तिफलका
न्तं चैतन्यमुच्यते तत्स्याश्रान्ता निवृत्तिश्चैतन्यं न च विषयभानमिति वेदान्तप्रक्रिया तथाचोक्तं आचार्यपादैः

छ १ स्थ २ नै १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुहिनस्य विराजमानौ हावपि व्याप्नुतोऽवश्यं। तच्चाज्ञानं धिषणानन्दो दाभासेन परिस्फुरेदिति। जगतीभुवने स्मायां हृत्स्नेभेदेज
नेपि चेति मेदिनीकरः॥ ३७॥ अथ नाहतचक्रस्थो भवानी धां करौ स्तौति समुन्मीलदिति। तत्किमप्यनिर्वचनीयं निर
म पमित्यर्थः। हंसद्वंद्वं हंसमिथुनं भजे सेवे। हंसश्च हंसी च हंसाविति सर्वमेकशेषं कृत्वा पश्चात्समासे द्वन्द्वः। पुमान्
स्त्रियेत्येकशेषः। प्रसिद्धहंसवैलक्षण्येन निरूपमत्वे वक्तुं हंसद्वंद्वं विशिनष्टि महतां मानसचरं। प्रसिद्धं हि
हंसद्वंद्वं प्रसिद्धे मानसे सरसि चरति द्वंद्वं तु महतां सनकादीनां मन एव सचरतीति तथा मानसचरमित्येतावत्येव वक्त

समुन्मीलत्संवित्कमलमकरंदैकरसिकं भजे हंसद्वंद्वं किमपि महतां मानसचरं यदा
लापादष्टादशगुणितविद्यापरिणतिः सदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ३८

येमहतामिति तु नस्यतीति गोचरत्वापि प्रायेण पुनरपि वैलक्षण्येन निरूपमत्वमेव वक्तुं विशिनष्टि एकस्मिन् र
सिकमेकरसिकं। संवित्कमलमिव संवित्कमलं समुन्मीलच्च तत्संवित्कमलं च तस्य मकरंद इव ब्रह्मसुखि
तेनैकरसिकं। पुनरपि निरूपमत्वमेव वक्तुं विशिनष्टि यदालापात्। यदालापादष्टादशसंख्यया गुणिता
स्ता विद्याश्च तासां परिणति यदीयालापएव॥ राम
२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्टादश॥ विद्यानुरूपेण [redacted] परिणमनतरत्यर्थः॥ यस्य निश्वसितमेतदिति श्रुतेः॥ अष्टादशशब्दो भावप्रधानो
ऽष्टत्वः॥ गुणनाममेव गण इति धातुः॥ कप्रत्ययान्तो गणिपर्यायः॥ महासर्वदा गुणदोषेष्विते दोषाकृष्ण मेवाद
तेगलानि॥ अविलंसमग्रं॥ अमलमिति पाठे गुणविशेषणं॥ दोषादिति पंचमी अपादाने॥ अथवा स्य एलोपे दोष पंचमी २
नह ४ मस्कोगुणमादत्सर्थः॥ एतेन मकस्य गुणमेव गृह्णाति दोषं तु नैवेति सूचितं॥ एतत्तु प्रसिद्धमेव श्रीमहादेवे॥
यद्वासदिति भिन्नं पदं॥ सद्रूपमबाधितं अतोपि प्रसिद्धा हंसहंद्रा हैलक्षण्यं॥ गुणदोषयोर्मध्ये गुणमात्रग ष ५
हणे दृष्टान्तः॥ अद्भ्यो जलेभ्यः पयो दुग्धमिव॥ प्रसिद्धं हंस हंद्र मितसप्ता हार्थः॥ पुराणन्यायमीमांसाधर्म्म
शास्त्रांगमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च तुर्दशेति श्लोकोक्ताश्चतुर्दश॥ आयुर्वेदो धनुर्वे
दो गांधर्वश्चार्थशास्त्रकं इति चतुष्टयं वेत्यष्टादश॥ ६ २॥ रामरामरामरामराम रामरामरामरामरामरा म

व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोर्द्धक्रमेण नवयर्थचकस्य मग्निरूपं महादेवं कालशक्तिरूपां भवानीं च स्तौति नवस्वाधिष्ठाने इति हे जननि तेऽश्रीरुद्रं
नौमि हुंसम यं कालशक्तिं चाहमीडे स्तौमि तं कमित्यपेक्षायामाह यदा लोके यस्य श्रीरुद्रस्य लोके आलोकने ईक्षणे त्यालोकस्त
स्मिन्नग्निनेत्रे लोकान् दहति सति दयार्द्रया स्नवदृष्टिः शिशिरमुपचारं शीतलोपचारं रचयति । अग्निं विशिनष्टि महति त्रैर
लोक्यव्यापिनि क्रोधकलिले क्रोधयुक्ते नष्टोऽहंकारः इं विशिनष्टि संवर्त्तं संवर्त्तं करोति संवर्त्तयति संवर्त्तयतीति संव
र्त्तस्तं पुनर्विशिनष्टि नवस्वाधिष्ठाने षट्चक्रे हुतवहमधिष्ठाय अग्निरूपमाश्रित्य हुतेत्यर्थः नियतं नियमेन स्थितं ॥

नवस्वाधिष्ठाने हुतवहमधिष्ठाय नियतं नमीडे संवर्त्तं जननि महतीं तां च समयां
यदा लोके लोकान् दहति महति क्रोधकलिले दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति

स समयां विशिनष्टि महतीं महत्त्वाख्याः सकलब्रह्माण्डमर्दकत्वात् जननीमिति पाठे तां [redacted] प्रसिद्धां जननीं जगन्मातरं
त्वां चेडे स्तौमि योऽयं त्रत्र च संसमवीनोः षः शम्भोर्विशिष्टस्याश्लाघितत्वात् तथा संशम्भावदथ विधे स्वदयार्द्रा या दृष्टिरि
त्यनेनैव दर्शितः यद्वा अस्मिन् लोके भवानी शंकरदृष्टिस्तूयेते । अस्मिन् पक्षे हे जननि तेऽहं हुतवहं अग्निरूपां मस्त
देवदृष्टिं तां च महतीं नवदृष्टिमीडे स्तौमि संबंधः तं कं तामित्यपेक्षायामाह यदा लोके यस्या दृष्टेरालोके आवलोके अ
वलोकने लोकान् दहति सति तव या दयार्द्रा दृष्टिः शिशिरमुपचारं रचयति अत्यल्प समाने दृष्टिः स्त्रियां वृद्धिलोचने दर्शनेऽपि

श्लो ४ धकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मनिग१

अथ पंचममणिपूरचक्रस्थं भवानीसहितं श्रीमहादेवं जगदात्मानं मेघरूपकेण स्तौति। तडित्वन्तमिति। ईश्वरमेकं श्रेष्ठं
शरणं गृहमाश्रयो यस्य तमपि कं जगदात्मनं श्रीमहादेवं निषेवे अतिशयेन भजे इत्यन्वयः। अपिसमुच्चये सर्वचित्र
क्रमः कश्चद्वाचं श्रीमहादेवं विशिनष्टि मेघरूपकेन मेघं मेघसदृशं। अत्र यथाक्ष्विपो पंत्राशलक्षणस्त्वविनाः
पीवशाट्मिवार्योगम्यते तीवशरः संवध्नते ग्रामणरवेति तथा मेघशब्देपि नतान्नेन वृषुणमन्यसदृशे तथा
ह्यर्थगतिरितिन्यायेनैव मध्यशंतो मेघशब्दो मेघादन्यं मेघसदृशमाहेति मेघसादृश्यं महादेवे लक्ष्यते। श्रीमहादेवेत

तडित्वन्तं शक्त्या तिमिरपरिपंथिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषं तव
श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनं ४० ॥ ॥

तमहनि१

त्रिवारणार्थं मेघं विशिनष्टि तमइव श्यामस्तमः श्यामस्तं इत्युपमानानि सामान्यवचनैरिति समासः स जलएव हि मे
घस्तमः श्यामो भवति जगत्तापहारी च तद्वन्महादेवोऽपि जगत्तापहारीति तमः श्याम मेघसादृश्यं श्रीमहादेव इति ध्व
न्यते। मेघसादृश्यं महादेवं विशिनष्टि तमः श्याम इति तमइव श्यामस्तमः श्यामस्तं। अत्र मतिभेदेन महादेवे श्या
मत्वादृष्ट्या तमिति पाठेनं प्रसिद्धं श्यामं गौरवर्णमिति व्याख्येयं मेघसादृश्यार्थं पुनरपि विशिनष्टि महादेवं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्त्या सकलसृष्ट्यादिसमर्थरूपया पार्वत्या तडित्वंतं। तिमिरस्य परिपंथि विरोधि स्फुरणं यस्यास्तया। एतेन स्थि
रविद्युत्वेनालौकिकमेव तादृशिता। पुनर्विशिनष्टि नाना अनेकप्रकाराणि रत्नानि येषु तानि च तान्याभरणानि
नानारत्नाभरणानि परिणद्धेंद्रधनुर्वा च नानारत्नाभरणपरिणद्धं इंद्रधनुः विस्फुरंति नानारत्नाभरणपरिण
द्धेंद्रधनूंषि यस्मिन् तं परिणद्धशब्दो विस्तीर्णपर्यायः एतेनेंद्रधनुर्वाद्भुत्वेनाप्यद्भुतमेव तादर्शिता। तापहा
रित्वेनापि मेघसादृश्यं भुवन् विशिनष्टि हरेत्नि। हरति चोरयति अज्ञानन्तादि स्वरूपं सर्वस्येति हरो वाधः समि
हिर इव सर्वोपतापकत्वात्। तेन तप्तं त्रिभुवनं वर्षन्तं ज्ञानामृतवृष्ट्या सिंचन्तमित्यर्थः कामक्रोधादि द्वा
राः ज्ञानस्यैव सर्वोपतापकत्वं सकलश्रुतिस्मृतीतिहासपुराणप्रसिद्धमेव। कोव्रतलोसमीलभयमदहेषु
भास्कर इति मेदिनीकरः॥ तडित्वत्वेन शक्त्या तिमिरपरिपंथिस्फुरणया तमः श्यामं मेघं जननि परिणद्धेंद्रध
नुषं स्फुरन् नानारत्नाभरणमणिप्ररकेकशरणं निषेवे वर्षंतं हरमिहिरतप्तं त्रिभुवनं। इति कवित्वा गयदानम्रा
भवानीपरत्वेन व्याख्येयः। तथा हि जननि तव देहं निषेवे इति देहपदमध्याहृत्यान्वयः देहं विशिनष्टि मेघ
एवं वत्व्याख्येयं शक्त्या स्वरूपचिंतया तडित्वं परिणद्धेंद्रधनुषी इन्द्रधनुः सदृशो भ्रुवौ यस्मिन् तं विद्युतस्मायस्मात्त
स्माद्भयोः सादृश्यं स्फुरंति नानारत्नखचितानि आभरणानि यस्मिन् सर्वासो मणिप्ररेकशरणं च्यते अन्यत्सर्वं स राम

८ हेरं मानं ५० २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ षट्चक्रस्थं पार्वतीसहितं श्रीमहादेवं स्तौति तवाधार इति हे जननि भवात्मानं भवदेहं लास्यपरया समयया काल
ग्रस्या सह वंदे लास्यम त्रजगन्निर्म्माणमेवोपहालास्यपरया समयया मृ नावरविधियुक्तयात्वयेतिसंवंधनीयं । नव
रसाय त्र तत्वतन्महाताण्डवं तत्र नटइव तां महाताण्डवं ब्रह्माण्डनिर्म्माणमेव । ब्रह्माण्डनिर्म्माणस्य शृंगारादिनवरसयु
क्तमेव नटेनाण्डवकथ्यते उभाभ्यां भवानीशंकराभ्यां । ब्रह्मौ सन्निधाप्याहं एताभ्यामिदं जगत् जज्ञे । जातं जनकज
ननीमत्मातापितृमत् । परमकारुणिकत्वेन देवौ विधि नष्टितुमय मिदंस्थावरजंगमरूपं चेतनाचेतनरूपं

तवाधारे मूले सह समयया लास्यपरया नवात्मानं वंदे नवरसमहाताण्डवनटं उभाभ्या
मेताभ्यामुदयविधिमुद्दिश्य दययासनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं ४१

वा कार्यकारणरूपं वा स्थूलं सूक्ष्मरूपं वा जगद् उद्दिश्य कृतायाद्दयातयोपलक्षिताभ्यां जज्ञे जग उदयविधिमिति पा
ठे उदयस्य विधिर्विधानं तं । पुनर्विशिनष्टि सनाथाभ्यां नाथेनाधयाज्ञायां नाथनं नाथऐश्वर्यं नाथेन सह वर्त्तत इ
ति सनाथौ ताभ्यां पक्षे समानौ नाथौ सनाथौ ताभ्यां समानेश्वराभ्यामित्यर्थः । नवरूपाभ्यामिति नवकव्यमेताभ्यामिति
पदैनैव हि त्वं लाभादिति चेत्न । नहि तत्प्रकरणात् यथाहाभ्यामागन्तव्यं हाभ्यां एव दातव्यमिति प्रसंगे हाभ्यां ब्रा
ह्मणाभ्यां दातीत्यत्र न हि शाहप्रयोग वैयर्थ्यं तद्वदत्रापि । ताण्डवं नटनं नाथं लास्यमित्यमरः ॥ ४१ ॥ एम एम ए

Nepal Samskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तवेद्यं यद्रूपं देव्याः स्वर्केशाद्गोचरं । तन्तुत्वाः श्यामलां मन्त्रिमन्त्रवाक्याः स्तौति शंकरः ॥ एवं च यद्वाक्याः स्वरूपं स्तुत्वा
ऽधुना आपादतलमस्तकं देहं स्तोतुकामो ऽ किरीटं स्तौति गतैरिति । हे हिमगिरिसुते तव किरीटं कः कीर्तय
तु वर्णयतु नि रूपमतात् नया पिंमीउ इत्यन्वयः । किरीटं विशिनष्टि गगनमणिभिः सान्द्रं यथा स्यात्तथा घटि
तं सान्द्रघटितं निविडं रचितमित्यर्थः । गगने मणय इव गगनमणयः सूर्या द्वादश तैः माणिक्यत्वं मणिरूपतां ग
तैः प्राप्तैः । हैमं सौवर्णं । तं कमित्यपेक्षायामाह यस्य किरीटस्य छायायाः कान्तेः स्फुरणेन शबलाकर्तोराचन्द्रक

गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं किरीटं ते हैमं हिमगिरिसुते कीर्तयतु कः
तमीडे यच्छायास्फुरणशबलाचन्द्रकलिकाधनुः सौनासीरं किमिति निबध्नाति धिषणां ४२

लिकां चन्द्रस्य षोडशो भागो रूपं ग मिति बिषणां तु द्विबध्नाति जनयति । इति पाठे धिषणामाह । इदं सौनासी
रमैन्द्रं धनुः किमिति । हस्वा कला कलिका । यच्छायाच्छुरितं चन्द्रशकलमिति पाठे यस्य छायया च्छुरितं सं ए
लं च लच्छकलं च तच्चन्द्रशकलं चन्द्रखण्डं मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिके ऽपि चेति मेदिनीकरः ॥ मेदिनीवा
यमुकुटं किरीटं पुन्नपुंसकमित्यमरः ४२

नम३

24

एम
२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फा म

[redacted]॥ केशपाशं स्तौति धुनोत्विति। हे शिवे तन्नव विकुरनिकुरम्बं नोऽस्माकं ध्वान्तं मंधतमसमज्ञान
मित्यर्थः धुनोतु कलयतु नाशयत्वित्यर्थः। प्रार्थने चात्र लोट्। तुलितं सदृशीकृतं दलितं विकसितमिंदीवरवनं येन तत्
तुलितं च तत् स्निग्धं च श्यामं चेति तथा। यद्वा घनवत् स्निग्धं च तत् श्यामं चेति तथा। तत्र त्वद्धेतौ यदीति यदीयं यत्सं
दृं।धि

धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं घनस्निग्धश्यामं चिकुरनिकुरम्बं तव शि
वे. यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो वसन्त्यस्मिन्मन्ये बलमथनवाटीविटपिनां ४३

४ दृसंख्याषां१

वंधि। त्वदादीति चेति वृद्धछ रति च छसस्येयादेशे यदीय मिति रूपसिद्धिः सुरजिनोभावः सौरभ्यं। सहजं स्वाभाविकमु
प लब्धुं प्राप्तुं बलमथनवाटीविटपिनामिंद्रोपवनशाखिनां सुमनसः पुष्पाणि वसन्त्यस्मिन् चिकुरनिकुरंबे मन्ये अ
हमेवं तर्कयामि त्यर्थः॥ एतेनैवं भूतभवानीकेशपाशध्यानं मोहं निवर्त्तयतीति सूचितं॥ ४३॥ राम राम राम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सीमंतवर्णनमाह॥ वहंतीति। हे जननि तव सीमंतसरणिः सीमंतसरणिरिव सीमंतसरणिः नोऽस्माकं क्षेमं क
ल्याणं तनोतु विस्तारयतु। सीमंतसरणिं विशिनष्टि। वदनस्य सौंदर्यात्मनो लहरी परंपरा तस्याः परिवहनं परिवाहस्तस्य
स्रोतः सरणिरिव निम्ना॥ पद्धतिरिव। उपसर्गस्य घञ्यमनुष्ये बहुलमिति सूत्रे णपरिशब्दस्य दीर्घता। पुनर्वि

वहंती सिंदूरं प्रबलकबरीभारतिमिरद्विषां बृंदैर्बंदीकृतमिव नवीनार्ककिरणं तनो
तु क्षेमं नस्तव वदनसौन्दर्यलहरीपरीवाहस्रोतःसरणिरिव सीमंतसरणिः ४५

शिनष्टि सिंदूरं वहंती धारयंती कबरीभार इव कबरीभारः कबरीभारस्तिमिरमिव कबरीभारतिमिरं तस्य प्रबला
नां द्विषां वृंदैः समूहैर्वंदीकृतं नवीनार्ककिरणमिव प्रातःकालिनसूर्यकिरणमिव। कबरी केशपाशः अवंदी बंदी
इति बंदीकृतं॥४४॥ राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ क्रमप्राप्ते भ्रुवौ वर्णयति भुग्नाविति। हे भुवनभयभङ्गव्यसनिनि भुवने सर्वे निखिलं भयं भुवनभयं तस्य तद्भङ्गे व्यस
नमभ्यासस्तद्वति यस्मास्तत्संबोधनं तथा अन्यत्कर्म धारयत्सर्वकरं स्वप्नायोजित्यायोगात् मेत्रायेण किंचिद्भुग्ने
कुटिले तदीये भ्रुवौ इदं जगत्सृष्टिसिद्धं इति यतः धनुर्मन्ये तत्कथ्यामि। मधुकररुचिभ्यां भ्रमरकान्तिभ्यां नेत्राभ्यां
हेतुभ्यां धृतगुणे धृतज्यो भ्रुवौ इदं नरूपतां साधयितुं धनुर्विशिनष्टि रतिपतेः कंदर्पस्य सव्यादितरेण हितेन

भ्रुवौ भुग्ने किंचिद्भुवनभयभङ्गव्यसनिनि तदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमिदं ४७

पः करस्तेन गृहीतं यद्वा अकारप्रश्लेषेण असव्येतरो वामः प्रकोष्ठे मणिबंधे मुष्टौ च स्थगयति आच्छादयति
सति निगूढान्तरं संवृतमध्यं मन्ये इति तिङन्तप्रतिरूपको निपातस्तर्कयामीत्यर्थः॥ अन्तरमवकाशाऽव
धिपरिधानान्तर्द्धिभेदतादर्थ्येषु छिद्रात्मीयविनाबहिरवसरमध्यान्तरात्मसदृशेष्विति मेदिनीकरः ४७ एम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ललाटं स्तौति ललाटमिति। हे जननि तव यद्विमलं ललाटं आभाति तन्मुकुटे घटितखण्डं मुकुटघटितखण्डं तस्य द्वितीयं
शकलं शकलखण्डं मन्ये तर्कयामि। ललाटं विशिनष्टि। लावण्यद्युतिर्विद्यते यस्य तत् लावण्यं। अर्शआदिभ्योऽच्। लवण
स्य भावो लावण्यं ललाटश्लोभा द्युतिर्दीप्तिर्यस्मिन् तत् शशिखण्डद्वयमुभे हे विपर्यासन्यासो वैपरीत्येन घटना तस्मा
द्धेतोरुभयमपि संभूय परस्परं संप्राप्य राकाहिमकरः पौर्णमासीचन्द्रः परिणमति। मिथ इति वदत्र सामानाधिकरणत्वं

ललाटं लावण्यद्युतिविमलमाभाति तव यद्द्वितीयं तन्मन्ये मुकुटशशिखण्डस्य शकलं
विपर्यासन्यासादुभयमपि संभूय मिलितं सुधालेपस्यूतिः परिणमति राकाहिमकरः ४६

उदयमिलनेन वेदरूपपरिणामे योगदर्शनं स्यात् त्रिवारणार्थं हिमकरं विशिनष्टि मिलितम् एकरूपतां प्राप्तः स्यादर्थः। तत्र 26
हेतुमाह सुधालेपेन स्यूतिः सेवनं यस्मिन् सः। उभयमपि संभूय च मिथ इति पाठे स्पष्ट एवार्थः। सुधालेपस्फूर्त्तिरिति
पाठे सुधालेपेन स्फूर्त्तिरेकत्वज्ञानं यस्मिन् राकाहिमकर इति व्याख्येयं संप्राप्यार्थः लवङ्गदीप्तिषोः स्मियामि राम
मिति मेदिनीकरः ४६॥ एमएमएममरा। णं २६

अथक्रमप्राप्तेभ्रुवौवर्णयतिभ्रुवाविति। हेभुवनभयभङ्ग-व्यसनिनिभुवनेसर्वनिमित्तंभयंभवनभयंतस्यभंङ्गे-व्यसन(
मभ्यासंतत्रहियत्नंयस्यास्तत्संबोधनं तथा। अत्रकर्म्मधारयएर्वकरस्त्रस्यायोत्रित्ययोगाभिप्रायेण किंचिद्भुग्नेकुटिलेत्व
दीयेभ्रुवौइदंजगत्प्रसिद्धंइतिपतेर्धनुर्म्मन्येतर्क्कयामि। मधुकररुचिभ्यांभ्रमरकांतिभ्यांनेत्राभ्यांहेतुभ्यांधृतगुणे
धृतज्योभ्रुवौईदृग्रूपतांसाधयितुंधत्रा विंहितनहिरतिपतेः कंदर्पस्यसव्यादहितादितरोयःकरस्तेनगृहीतंयद्धनुस्त्र

भ्रुवौभुग्नेकिंचिद्भुवनभयभङ्ग-व्यसनिनितदीयेनेत्राभ्यांमधुकररुचिभ्यांधृतगुणे धनु
ये र्म्मन्येसं‸तरकरगृहीतरतिपतेःप्रकोष्ठेमुष्टौचस्थगयतिनिगूढान्तरमिदं ४७॥ ॥

अकारप्रश्लेषेण असव्येतरोवामः प्रकोष्ठेमणिबंधेमुष्टौचस्थगयतिआच्छादयतिसतिनिगूढांतरंसंवृतमध्यंमन्ये
इतितिङ्प्रतिरूपकोनिपातस्तर्क्कयामित्यर्थः। अन्तरमवकाशोऽवधिपरिधानांतर्द्धिभेदतादर्थ्येछिद्रात्मीयविना
बहिरवसरमध्यात्मसदृशेष्वितिमेदिनीकरः॥ ४७॥ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधुनाः होत्रप्रवर्त्तकत्वेन जगदुपकारकतया नेत्रत्रयं वर्णयति । हे भवानि तव सव्यं दक्षिणं नयनं अहः सूते जनय
ति यद्वा अकारप्रश्लेषेण सव्यं दक्षिणं । तत्र हेतुः अर्क्कात्मकतया सूर्यरूपतया । वामं चन्द्ररूपं नयनं त्रियामां रात्रिं । तत्र हे

अहः सूते सव्यं तव नयनमर्क्कात्मकतया त्रियामां वामं ते सृजति रजनी
नायकतया तृतीया ते दृष्टिर्दरदलितहेमांबुजरुचिः समाधत्ते
संध्यां दिवसनिशयोरन्तरचरीं ४८ ॥ राम भम

तु रजनीनायकतया चन्द्ररूपत्वेनेत्यर्थः ॥ तृतीयां ते दृष्टिः संध्यां समाधत्ते सृजतीत्यर्थः । दर ईषद्दलितं च तद्धेमांबु 24
जं च तस्येव रुचिर्यस्याः इति तृतीयाः ग्निदृष्टिर्दिवानिशयोरन्तरे मध्ये चरती त्यन्तरचरी ताम् ॥ चरेष्टः इति ट प्रत्यय
स्ततष्टिड्ढाणञिति ङीप् । सव्यं दक्षिणवामयोरिति कोषात् ॥ राम
२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं नयनत्रयं निर्वर्ण्य दीनीनक्षापाररूपां दृष्टिं तन्नन्नगरीरूपकेणावर्णयति विस्तारे निहे जननि ते तव दृष्टिः कृपाः वलो
कनं वङ्कनगरविस्तारविजया वङ्कुनगरविस्तारशादृशीत्यर्थः ध्रुवं शङ्के विपर्ययं कोन्निरत्वे सादृश्यालङ्कारः बहुनगरविस्तारसादृ
श्यहेतुं वदन् दृष्टिं विशिनष्टि तन्नगरीनामभिन्नव्यवहारणं व्यवहारस्तद्योग्या तत्र प्रथमतो नामतोऽर्थतश्च श्रीरामचन्द्रनग
रीसादृश्यं ब्रुवन् दृष्टिं विशिनष्टि कुः पृथिवी वलयमिव शोभते तु भूतायेषा ते कुवलया राजानः तैरयोध्या योद्धु
मशक्या । विशाला विस्तीर्णा कल्याणी कल्याणगुणविशिष्टा स्फुरद्रुचिर्यस्याः श्रीरामनगरी सा तव दृष्टिस्तत्सादृशी
त्यर्थः ॥ सादृश्यं च समानधर्माक्रान्ततया । दृष्टिपक्षे विशालत्वादयो धर्म्माः संत्येव । कुवलयैः अरिशरीवैरैः योध्याः न भि

विशाला कल्याणी स्फुरद्रुचिरयोध्या कुवलयैः कृपापारावारा किमपि मधुरा भोगलतिका
अवन्तिर्दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ४९ ॥

भोग्या सदृशीत्यर्थः ॥ यद्वा विशालेत्येवमादयो नगरीभेदाः मधुरासादृश्यमाह किमपि निरूपमं मधुमधुत्वमाह्लाद
कत्वरातिश्च रत्नरतिः मधुरा । पारं परतीरम् अवारमर्वाक्तीरं विद्यते यत्र स पारावारः कृपैया पारावारः कृपापारावारो विद्
रुः स विद्यते यत्र सा मधुरा । एवं भूताया मधुरामाते दृष्टिस्तत्सादृशीत्यर्थः ॥ दृष्टिस्तत्सादृशीत्यर्थः । दृष्टिपक्षे मधुराश
हेनाह्लादकत्वं । कृपापारावारधीरा कृपासमुद्ररूपा । कृपाधारा धारेति पाठे धारानगरी ते दृष्टिस्तत्सादृशी कृपाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारापरं पारापरं सा सरस्वती तस्या आद्यत्वमेव सा हर्षो मत्त भोगलतिका भोगः सर्वसुखं तस्य लतिके वाश्रयरूपा भागव
तीनगरीति तन्मात्हर्षे देशापि अवतिरतेति भक्षमात्र मित्युर्वन्नि नगरी भवानी हर्षिर पीत्यर्थे न सा पंथ यद्वा हर्षि
नेत्रमात्रणमिति ॥४९॥ ललाटमध्यस्थ मग्निनेत्रं स्वभावतोः रूपमेवोत्प्रेक्षमाणो वर्णयति । कवीनामिति हे
जननि तवाः लिकनयनं ललाटस्थमग्निनेत्रं स्विदिति वितर्के किमसूयासंसर्गाद्धेतोररुणमारक्तं जातः । असू
याशङ्क्यो ऽवश्यं तिपरः अस्या यो हेतुमाह करेति । शृंगारादिनवरसास्वादेतरलो वं च लोकर्णयुगलमसुंवत्ता

कवीनां संदर्भस्तबकमकरन्दैकरसिकं कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलं
अमुंचन्तौ दृष्ट्वा तव नवरसास्वादतरला वसूयासंसर्गादलिकनयनं किंचिदरुणं ५०

वत्पजनौ कटाक्षव्याक्षेपभ्रमरकलभौ दृष्ट्वा । कटाक्षयो व्याक्षेपो कटाक्षव्याक्षेपौ भ्रमरकलभाविव कटाक्षव्याक्षेप
भ्रमरकलभौ कर्णयुगलं विशिनष्टि कवीनां व्यासादीनां संदर्भा वाक्यग्रथनानि स्तबकाइव तेषां मकरंदः श्रवण
जन्यं सुखं तस्मिन्नेकं मुख्यं रसिकं रसास्वादपरं । अयमर्थः यः स्तुत्यं बंहने निरंतरं कविसंदर्भश्रवणजन्यसु
खलोलुपे कर्णयुगलं सेवमानेपरमसुखमनुभवतो मम लंतरालवर्तिनेतीर्ष्ययेवारुणमिति भावः । असूयासंस
र्गादिति वेतीव शाटेऽधाहा यः ॥५०॥ कौस्तिदृर्गि२

पि२

राम
२८

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं श्रीभवानीदृष्टिं शृंगारादिरसविष्टतया स्तौति शिवेति। हे जननि ते तव दृष्टिर्विजयत इति क्रियापदम
ध्याहृत्य योज्यं विजयमेवाह युगपत्सप्तरसाविष्टतया शिवे शृंगारार्द्रा शृंगाररसेन युक्ता। तदितरमुखे शिवेतरज
ने कुत्सने वीभत्सानतरं कर्तव्यं यस्याः सा अत्र शिवेन तदितरपदाभ्यां श्रीमहादेवे कल्याणरूपे शृंगाररसोदयस्त
दितरपुरुषे अमङ्गलरूपे च वीभत्सरसोदय उचित एवेति सूच्यते। अत्र शिवे इत्येवमादौ च सप्तमी विषये। गंगायाः स

शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा सरोषा गंगायां गिरिशचरिते विस्मयवती। हरा
हिभ्यो भीता सरसिरुहसौभाग्यजयिनी सखीषु स्मेरा ते जननि मयि दृष्टिः सकरुणा ५१

पत्नीत्वात्सरोषेति रौद्ररसाविष्कारः गिरिशचरिते गिरौ पर्वते शेत इति गिरिशस्तस्य चरिते श्मशानवास
दौ अमङ्गलरूपस्यापि मङ्गलव्यवहार इत्यर्थः॥ विस्मयवती त्वद्भुतो रसः हरे येऽहयो भूषणरूपास्तेभ्यो भीते तिभ
यानको रसः सरसिरुहस्य सौभाग्यं सौंदर्यं तस्य जयो विद्यते यस्याः सा तथेति वीररसः। अत्र तन्मुरुष सर्वकर्
न्मत्वयोर्नित्ययोगाभिप्रायेण ततश्च सदाविकसितत्वेन सदानंदवत्त्वात्सूचिता॥ सखीषु स्मेरेति हास्यरसः
मयीति स्तोता श्रीशङ्करस्तस्मिन्सकरुणेति करुणो रसः॥५१॥ रामराम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नवान्याः सख्ये वद्रूपे नेत्रे स्मरशरत्वेनोत्प्रेक्षमाणे वर्णयति। गतेरिति। हे गोचाधारपतिकुलोत्तंसकलिके तव ने
त्रे आकर्णाकृष्टस्मरशरविलासमाकर्णमाकृष्टौ पौ श्रमरशरौ तयोर्विलासं शोभां कलयतो धारयतः॥ उत्तंसः कर्णभू
षणं तद्रूपा कलिं स्मरं शरद्वयार्य्यं नेत्रे विशिनष्टि कर्णाग्र र्णं कर्णसमीपं गते प्राप्ते गरुडे यथा तथा पक्ष्मलिलोमा
निरञ्चती धारयती॥ यद्वा गरुडे यथा तथेति। पुरशब्देन सुवर्णरजतलोहमयं नगराकारं देहविमानमुच्यते

गते कर्णाभ्यर्णं गरुडइव पक्ष्मालि दधती पुरां मेतुश्छिन्नप्रसमरसविद्राववणपरे॥ इमे ने
त्रे गोचाधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्मरशरविलासं कलयतः॥ ५२॥

तस्या दैत्याश्चपिततस्त्रपुरां मेतुं मेदकस्य श्रीमहादेवस्य प्रशमरसविद्राववणपरे। विषयोदासीन्यपर्विकामनसः
स्वात्मपरमाप्रशमस्तन्निरसनपरे। पुरामित्यत्र कर्तृकर्मणोः कृतीति कर्मणि षष्ठी मेतुरित्यत्र कर्तरि। मिन
नीति मेत्ता तस्य मेतुः पक्ष्मसूचा हि सूत्रांशे किंजल्के नेत्रलोमनीति मेदिनीकरः॥ ५३॥ ॥ ॥ राम २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न प

पुरं पिप्रकारांतरेण नेत्रत्रयं स्तौति विभक्तेति। हे ईशानदयिते [redacted] इष्टे ब्रह्माणमारभ्य पिपीलिकापर्यंतमि
ती शान्तो महादेवस्तस्य दयिता तत्संबोधनं तथा। यद्वा ईशानो दयितो यस्यास्तत्संबोधनं तथेति वक्रोक्तिः। त्वन्
नेत्रयं। वुद्धैमितित्र प्राप्याहि दमिति। गुणानां त्रयं विभ्रदिव विभातीत्यन्वयः। गुणैः सादृश्यं वक्तुं नेत्रत्रयं विशिनष्टि विभ
क्तेति। त्रयाणां वर्णानां समाहारस्त्रिवर्णी तत्त्रिवर्णमेव त्रैवर्ण्यं स्वार्थे ष्यञ्। विभक्तं त्रैवर्ण्यं यस्मिंस्तत्। वर्णशब्दोऽत्र
रूपवाची ननु स्तव्याग्निनेत्रे लोहिते चंद्रनेत्रं तु शुक्लमेवेति। कुतो नीलत्वम् अत आह। व्यतिकरः संपर्कः संजातो यस्

विभक्तत्रैवर्ण्यं व्यतिकरितनीलाञ्जनतया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते
पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान् रजः सत्वं विभ्रत्तम इति गुणानां त्रयमिदं ॥ ४७॥

स्मिंस्तत् व्यतिकरितं नीलं यथा स्यात्तथा अञ्जनं नीलाञ्जनं व्यतिकरितं नीलाञ्जनं यस्मिंस्तत्तथा तस्य भावस्तत्ता तया त
व्यतिकरितनीलाञ्जनतयेति पाठे नीलं च तदञ्जनं चेति समासः। तच्च नीलपदवैयर्थ्यं व्याप्यत्वाभावादि
ति वाच्यं मुख्यत्वे तेनेति अञ्जनमित्युक्ते सिद्धा नीलत्वप्रतीतेः। गुणत्रयमेवाह रज इति। सात्त्विकशास्त्रप्र
सिद्धा बुद्धौ सन्निधापयति हि द्वितीयमिदमिति किमर्थं गुणत्रय मिर मित्य पेक्षायामाह। पूर्वमेकं वा
रं स्रष्टुं द्रुहिणहरियोर्देवान् लयोपरतव्यापारास्तान् स्वापुनरपि स्रष्टुमित्यर्थः॥ बिभ्रत्तम इति पाठे गु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लप्रदर्शनार्थं इति भावः । द्रुहिणहरिनुतान् हरस्य चरणौ हे धीति हरिणहे प्राकस्य योऽस्य मे दुहिनैपदप्राकप्रयोगः अस्मदि
त एवं मित्यभ्यर्हितार्थे ताभिः प्रायेण वल्लोहितः आदाविति मेदनीकरः ॥५३॥ परमपावनत्वेन जगन्मा । सिद्धं वेलीरूपके न
नेत्रत्रयं वर्णयति पवित्रीकर्तुमिति पराधीनं परतंत्रं पशुपतिना पराधीनं हृदयं यस्यास्तत्संबोधनं तथा हे अनघेन
५५ विद्यते अघं पापं यस्याः सा रणादिनासाऽनघा तत्संबोधनं तथा । नोऽस्मान् पवित्रीकर्तुं नेत्रैस्त्रयाणां तीर्थानां
संभेदं संगं मुपनयसि प्रापयसि ध्रुवं शंके अतिप्रसिद्धावहौ मित्रेधाया हरसुमिति कानि तीर्थानीत्यपेक्षायामाह

पवित्रीकर्तुं नः पशुपतिपराधीनहृदये दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः नदः
न शोणो गङ्गा तपनतनयेति ध्रुवममुं त्रयाणां तीर्थानामुपनयसि संभेदमनघे ५४॥

नदः इत्यादि नदशब्देनात्र नदी लक्ष्यते सा च सरस्वती अत एव शोणः शुद्धोऽनुपस्थितापयकः सरस्वत्याः सरस्वती रजोरूपा तमो ३०
रूपा कलिंदजेति पुराणे रजोरूपत्वं वर्णनात् रजश्च लोहितमिति सांख्ये प्रसिद्धमेव । अन्वयानुपपत्तिः स्थलत्वं लक्षणवीजं वेली
९ सादृश्यार्थे न त्रयाणां त्रिविधानि चिह्नानि अरुणेति स्पष्टं दयामित्रैर्नेत्रैः । प्रसिद्धत्वं च तीर्थेऽपि शुद्धोऽपि परमोपकारत्वात्तीर्था
नां अरुणत्वादिकं स्पष्टमेव वर्णनं । अथवा शोणो नद रक्ता तथा च सुत्यन्नतोपमा पशुपतिपराधीनहृदये अनघे इति राम
च । पररूपेण परमपतिव्रतायाः परमपावनत्वाभवा माने त्राणं तीर्थे रूपतास्य कैर्वण्यते ॥५४॥ ॥ ॥ ॥ ३०

देवि१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरपि प्रकारान्तरेण नेत्रे वर्णयन्ति तवेति। महादेवश्रीस्पर्द्धितपश्चरन्ती पर्णमपि त्यक्तवत्यतोऽपर्णा तत्संबोधनं तथाक्षिपक्ष्मलोः संयोगघटिका क्रिया निमेषः। न विद्यते निमेषो यासां ता अनिमिषाः शफरिकास्ता एव निलीयन्त इति निलीयन्ते निश्चितं। तत्र हेतुः हे अपर्णे तव कर्णेजप इति कर्णेजपे ते च ते नयने चेति तथा तयोः पैशुन्यं परदोषाविष्करणं तेन चकिता भीताः स्तम्बकर्णयोरमिजपोरित्यनेनाच्प्रत्ययः। हलदन्तात्सप्तम्याः संज्ञायामिति सप्तम्या अलुक्। अयमर्थः। अनिमेषत्वादल्ला दकत्वाच्च शफरीभवानीनेत्रयोः परस्परं सादृश्यं सदृशीनां च शफरीकाणां च स्पर्द्धा स्पर्द्धया च शत्रुभावस्ततश्च भवानी

तवापर्णे कर्णेजपनयनपैशुन्यचकिता निलीयन्ते तोये नियतमनिमेषाः शफरिकाः। इयं च श्रीर्बद्धच्छदपुरकपाटं कुवलयं जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥

नेत्रयोः कर्णेजपत्वं दृष्ट्वा निलीयन्त इत्युत्प्रेक्षा द्वारा नेत्रविस्तारो वर्ण्यत इति। तथा इयं श्रीः कुवलयशोभा प्रत्यूषे प्रातःकाले बद्धं छदपुटकपाटं यस्मिंस्तत् पुरश्चः संकोचवाची छदानां पुटं कपाटमिव बद्धं छदपुटकपाटं यस्यां स्यागः क्रियाविशेषणमिति तथा निशि च विघटय्योद्घाटकपाटमित्यर्थात् कुवलयस्य दिवा न तथा शोभा मुद्रितत्वात्। रात्रौ च शोभा विकसितत्वात्। अप्रततेः किं भवानीनेत्रभीता कुवलयलक्ष्मीर्दिवा कपाटं दत्त्वा पलायते रात्रौ चागत्य प्रविशतीति ॥५५॥

पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रनरपि नेत्रयोरुन्मेषनिमेषौ वर्णयति। निमेषोन्मेषाभ्यामिति॥ उन्मेषोऽस्ति पद्मविभागजनिका। क्रिया॥ न,ती
याहेतौ॥ जगती त्रैलोक्यं चतुर्मुखरूपधारी शम्भुर्यदा निद्राति तदा त्रैलोक्यं नश्यति॥ यदा च जागर्ति तद

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः सन्तो धरणिधरराजन्यतनये त्वदु
न्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ५६

दा जगदुदेति सन्तः श्रीव्यासादयः आहुरित्यर्थः॥ भवानीत्वं विष्णुरिति पुराणवाक्यात् निर्धार्य नेत्रपाल राम
नै॥ शङ्के तर्कयामि परिहृतो निमेषो याभिस्ताः॥ स्वोत्प्रेक्षमन्यत्॥५६॥ ॥ ॥ ॥ ३१

वस्तीनः परमेश्वरस्तमिन्नाधकर्त्ता· भवतात्कालेभोगेभवानी प्रत्यक्षविषयत्· गोपेश्वकाली·समरेदुर्गाइति·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतःपरंरूपादर्शिं प्रार्थयमानो भवानीं स्तौति दृशेति हे शिवे कल्याणि रूपेण रूपवया दृशा रूपोपलक्षितया दृक्पाः
वलोकनेनदवीयांसमपि मां स्नपय विषयीकुर्वि त्यर्थः। दृशं विशिनष्टि द्राघीयस्या अतिशयेन दीर्घया द्राघीयसी तया
सर्वदिक्को त्यर्थः। दवीयस्त्वमपि देशव्यवधानापेक्षं वा कालव्यवधानापेक्षं वा ज्ञानव्यवधानापेक्षं वा अत्रज्ञानव्यवधानपे
क्षं दवीयस्त्वात याद्वीयांसमतिशयेन दूरं त्वदनुसंधानरहितमित्यर्थः। अतएव दीनं दुःखितं ननु मन्नूपादृशातव
किं स्यादतआह अनेन रूपावलोकनेन अहं धन्यः कृतार्थः स्यामिति शेषः॥ ननु अस्मिन्रूपादर्शी कुर्वति हन्ति र

दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे
अनेनाहं धन्यो भवति न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः ५७ ल१

पि संभाविता स्यादतआह नन्वेति। इयता रूपावलोकमात्रेण कृपावलोकनकर्तुर्हि प्रयत्नानन्तरं त्वत्तिः सं
भाविता तव तु लपादृक्यातमात्रेण वपुरुषार्थसिद्धेर्न तदर्थप्रयत्नापेक्षेति हानिसंभावनाऽपि नास्तीति भा
वः। एतन्नवस्वाभाविकं न त्वौपाधिकमित्यत्र दृष्टान्तमाह वन इति समः तुल्यः कराणां निपातो य
स्य सः। वने मृतकरसेकेनौषधीजीवने हन्तिर्न हर्म्ये/धनीनां गेहे त्याभो नास्तीत्यर्थः॥५७॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५८

अथ कर्णद्वयाग्रभागद्वयं कामस्य रूपकेण वर्णयति अरालमिति नगछन्तीत्यगाः पर्वतास्तेषां राजन्यो महान् हिमगिरिः हि
मवांस्तस्य कन्ये ते तव पालीयुगलं पाल्योः कर्णाग्रभागयोर्द्वयं केषां द्रष्टृणां कुसुमशरकोदण्डकुतुकं कामधनु
३२ श्चमत्कारं नाधत्ते ॥ न करोति पालीयुगलं विशिनष्टि यत्र पालीयुगले ॥ श्रवणपथान् श्रवणपथस्तमुल्लङ्घ्य
अपितु सर्वेषामेवेत्यर्थः

अरालं ते पालीयुगलमगराजन्यतनये न केषामाधत्ते कुसुमशरकोदण्डकुतुकं तिर
श्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसंधानधिषणां ५८

अतिक्रम्य विलसन् शोभमानः अपाङ्गव्यासङ्गः कटाक्षसंसर्गः शरसंधानधिषणां शरसंधानधिषणां बुद्धिं
दिशति ददाति उत्प्रेक्ष्य इति शेषः ॥ तिरश्चीनो वक्रो वक्रगामित्वेन पालिः कर्णतलाग्ने श्रोयं क्लाव(?)प्रदेशयोरिति मे रम
दिनीकरः ॥५८॥ पूव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मुखमुखेन स्तमोनो वर्णयति स्फुरद्दिति । हे जननि तवेदं मुखं तं मन्मथरथं मन्मथस्यायं मान्मथस्तं मन्ये तर्कया
मि ॥ रथं विशिनष्टि चत्वारि चक्राणि यस्मिन् स्तं । चतुश्चक्रं तत्संपादनाय मुखं विशिनष्टि गंडयोराभोगो गंडाभोगो स्फु
रन्तौ च तौ गंडाभोगौ च तत्र प्रतिफलितं ताटंकयुगलं यत्र तं ॥ तं कस्मिन्नुपेत्याया माहय मारुह्य महावीरो मारः प्र

स्फुरद्गंडाभोगप्रतिफलितताटंकयुगलं चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं यमा
रुह्य द्रुह्यत्यवनिरथमर्केंदुचरणं महावीरो मारः प्रमथपतये सज्जितवते ५८ [illegible]

यमपतये द्रुह्यति कुप्यति द्रुहेर्ष्यासूयार्थानां प्रति कोप इति चतुर्थी अर्केंदु चरणे यस्मिन् स्तमवनिरूपं रथमारुह्य
श्वस्वं शम्भुस्त्रिपुरं जितवत इति प्रथमे पति विशेषणे जिगायेति जितवांस्तस्मै जि क्रियापेक्षया चास्त्वमिति क
र्मणि द्वितीया ॥ मारस्य महावीरत्वं सर्वनियन्तुः श्रीमहादेवस्य प्रतिस्पर्द्धित्वेन ॥ ५८ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कुंडलगणमुत्प्रेक्षमाणो ऽवानीत्सोति सरस्वत्या इति हे सर्वाणि अविरतं सरस्वत्या देव्याः सूक्तीः श्रोत्रनाडी
ः श्रवणचुलुकाभ्यां पिबंत्याः साश्चर्यं एतस्यास्तव कुंडलगणः कर्णभूषणसमुदायः प्रतिवचनं प्रत्युत्तरमा
चष्टे इव कथयतीवा यद्यपि कुंडले द्वे एव तयोश्च गणता न संभवति तथापि तदवयवानां घटितानां बहु
त्वाभिप्रायेण गणशब्दप्रयोगः। अमृतलहर्याः कौशलं कुशलत्वं हरंतीति तथा ताः अमृतवत्सुखजनिका

सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः पिबंत्याः सर्वाणि श्रवणचुलुकाभ्यामविरतं
चमत्कारस्फाराद्यचलितशिरसः कुंडलगणो ऽनत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ६०

इत्यर्थः॥ सारस्वत्या इति षष्ठी संबंधे संबंधश्च प्रयोज्यप्रयोजकभावः सूक्तिरस्वत्योः श्रवणे चुलुके इव श्रवणचुलुके
ताभ्यां। उपमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासः चमत्कार आश्चर्यबुद्धिस्तेन यास्फारा तास्तु तिस्त २५
याचलितमीषत्कंपितं शिरो यस्यास्तस्या इति सर्वाणी विशेषणं कुंडलं कर्णभूषा पाशः पिचलयः पिचे ३३
ति मेदिनीकरः। कर्णशष्कुली ग्रैवेयाद्यलंकृतिः स्त्री श्रवणं श्रव इति कोशांतरे॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नासिकां वर्णयन्तः फलं प्रार्थयन्ते॥ असाविति। तुहिनानि हिमानि तद्युक्तो गिरिस्तुहिनगिरिस्तस्य वंश्याः सन्त-
तिस्तस्मिन् ध्वजपटी पताकेव शोभमाना त्वं तत्संबोधनं तथा असौ नासावंशः फलं फलतु जनयतु इत्यन्वयः॥ नासा वं-
श इवेति नासावंशः ऊर्ध्वत्वसाम्यात् नेदीयो निकटवर्त्ती। आत्मानं बहु मन्यमानः। आह अस्माकं परिव्राजकानामु-
चितं योग्यं॥ फलमत्रान निर्बंधनसंसारतापनिवृत्तिलाभमित्यर्थः॥ तत्र हेतुर्वादः शशोऽपि यतः

असौ नासावंशस्तुहिनगिरिवंशध्वजपटि त्वदीयो नेदीयः फलतु फलमस्माकमुचितं वह-
न्निर्मुक्ताः शिशिरतरनिश्वासघटिताः समन्ताद्यस्तासां वहिरपि च मुक्तामणिधरः
६१

पेक्षत इति। अदः शब्दवाच्यं नासावंशमुद्दिश्येह मा नौ विशिनष्टि यो निर्मल मुक्ताः शिशिरनिश्वासैर्घटिता नि-
र्मिता वहन् तासां मुक्तानां समन्तात् आधिक्येन वहिरपि मुक्तामणिधर इत्युत्प्रेक्षा फलं जातीफले मन्येहे नार-
स्येयुक्ति लाभयोरिति मेदिनीकरः ६१

विभ्रान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पक्वमप्यतमधरवर्णनमाह। प्रकृत्येति। शोभना दंता यस्याः सा सुदती तत्संबोधनं हे सुदति तव दंतच्छदरुचेर्व
राकीनुच्छा विद्रुमलता हा दृश्यं कथं कलयतु प्राप्नोतु। वराकीत्यत्र परोहा इति पाठे। अपरोहे तु त्वद्दंतच्छदरुचिप्रति
हतरुचेर्विद्रुमलताया सदृशपलाभोः संभावितएवाऽत्र परोहेऽपीत्यर्थः सादृश्यकलने हेतुर्वक्रुं दंतच्छदरुचि विशि

प्रकृत्या रक्तायास्तव सुदति दंतच्छदरुचेर्वराकी सादृश्यं कलयतु कथं विद्रुमलता नवि
बंतद्धिं वप्रतिफलनलाभादरुणितं तुलामध्यारोढुं कथमिव न लग्नेत कलया ६२

न हि प्रकृत्या स्वभावत एव रक्ताया विद्रुमलताया रुचं हिंबप्रतिफलनलाभादरुणेतेति भावः तथा बिंबाः फलं
बिंबं तद्दंतच्छदरुचेस्तुलामध्यारोढुं प्राप्तुं कथमिव न लग्नेत नेति द्वौ नञौ प्रकृतमर्थं गमयत इति न्यायेन लग्नेतैवे
त्यर्थः। कलया षोडशांशेन तत्र हेतुर्वदन्नु बिंबं बिशिनष्टि त्वद्धिंबं त्वन्मुखे स्वत्वप्रतिफलनलाभात्त्वत्संक्रमण
लाभादरुणितं न तस्य स्वाभाविकोऽरुणिमेति भावः कथमपि विलग्नेतेति पाठे क्षि र ख्यातलनेन वा व्याख्येय
६२

राम
३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतः परं भवान्याईषद्धास्यमुत्प्रेक्षया वर्णयति स्मितेति। अतिशैथिल्यतोरसो यस्मिन्नु तव वदनचंद्रः स्मित
ज्योत्स्नाजालं वा विशेषणं। चंचुजडिमा तु एडजडत्वं अतस्त्वं चंचुजडिम्नो हेतोः रम्लरुचिर्येषां ते तथा कांजिक

स्मितज्योत्स्नाजालं तव वदनचंद्रस्य पिबतां चकोराणामासीदतिरसतया चंचुजडिमा
अतस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वच्छंदं निशि निशि भृशं कांजिकधि
या ६३

सौवीरं तद्धिया। अमृतलहरीकिरणपरम्परां पिबंतीत्युत्प्रेक्षितेन साम्यमन्यत्॥ ६३॥ राम राम राम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जिह्वाग्रस्थे हसमानौ वर्णपंक्तिः अविश्रांतमिति। अविश्रांतमिति क्रियाविशेषणं। निरन्तरमित्यर्थः। गुणगणकथाया
अभ्येडनमभ्यासएव परं केवलं यस्याः तस्याः रसनायाः हेतुः कृष्णजवापुष्पं शिवाकारारक्तं तस्यैवच्छाया कांतिर्व्याप्तः प्रा
पठंमिर् जवेत्वत्केविःजयेतिलिंतस्मरं कोपवातप्रकारेणजवायावस्मापीतात्।।७ अन्तरमाह यदिति। यस्यास्तवाजे श्री

अविश्रांतं पत्युर्गुणगणकथाम्रेडनपरा जवापुष्पच्छाया तव जननि जिह्वा विजयते यद-
ग्रासीनायाः स्फटिकदृषदच्छच्छविमयीर् सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ६४

ल क्षे

सीनाया उपविष्टायाः सरस्वत्या मूर्तिर्देही माणिक्यवपुषा माणिक्यरूपेण परिणमती। त्युक्ता। परिणमेदेतु
वरन्मूर्तिर्विशिनष्टि स्फटिकरूपायाः दृषदच्छच्छविर्यस्याः छविः कांतिस्तन्मयी तन्मयी तस्यै वुरेत्यर्थः।। यद्वा यच्छब्दोऽत्र राम
जिह्वाविशेषणं परहृद्धेपेः पितश्चदग्राहारेणान्वयः।।६४।। ।। ।। ।। ३५

७२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीभवान्या वदनतांबूलानि उल्लेभानि देवदेवानामपीति कथयन् भवानीं स्तौति। रणेजित्वेति शशिशकलस
दृशानियानि कर्पूराणि तैर्दुर्वलावदनताम्बूलशकलाविलुप्यन्ते प्रसन्नयातया दत्तावदनताम्बूलखंडंम
हाप्रसाद इति बुध्यामनस्यानन्दन्त्यर्थः। प्रसादेन वदनतांबूलदानेहेतुमाह रणेजित्वेति। परिहृतं शिरस्त्रंशिर
स्त्राणं यैस्ते तथा तैः एतेन भगवत्या निर्माल्यमपि पवित्रमनाहृतशिरस्त्राणैर्भक्त्या ग्राह्यमिति दर्शितं भवति

रणेजित्वा दैत्यान्परिहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चण्डांशु त्रिपुरहरनिर्माल्यविमु
खैः विशाखेन्द्रोपेन्द्रैः शशिशकलकर्पूरशकलाविलुप्यन्ते मातस्तववदनताम्बूलकबला ६५

निवृत्तैः प्रत्यागतैः। चण्डांशु त्रिपुरहरनिर्माल्यविमुखैरित्यनेन भगवत्या एकान्तभक्तत्वं विशाखेन्द्रोपे
न्द्राणां दर्शितं। त्रिपुरहरस्य सर्वेश्वरतात्सर्वोपास्यत्वात् निर्माल्यं भक्ष्यत्वेन प्राप्तं विमुखपदेन ध्वनितं
चण्डांशो महादेवानुचर इति प्रायेणेति द्रष्टव्यम्। जितं शकलखण्डं वा पुंसीत्यमरः।।६५।।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवान्या वाणीत्याति तियं च्येतिः विपंच्या वीणया पशुपतेरवदातं निर्मलं चरितं गायन्ती वाणी सरस्व
ती निभृतं निश्चलं यथा स्यात्तथा चोलेनोपरितनवस्त्रेण वीणां निचुलयति गोपयतीत्यन्वये ति शेषः॥
अत्र हेतुं वदन्वीणां विशिनष्टि तदीयैर्माधुर्यैस्त्वदीयवाणीगतमाधुर्यैरपलपितानि रुतेस्तन्त्रीणां

विपंच्या गायन्ती चरितमवदातं पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने तदी
यैर्माधुर्यैरपलपिततन्त्रीकलरवां निजां वीणां वाणी निचुलयति चोलेन निभृतं ६६

वीणागुणानां कलो रवो यस्याः सा तां॥ कदेत्यपेक्षायामाह त्वया साधुवचने वक्तुमारब्धे सति चमत्कारवशा
च्चलितमौलिकंपितं शिरो यस्यास्तया देव्येति भवानीविशेषणं ते संबोधनम् त्रीयं च चोलः कूर्पासकोऽस्त्रियामित्यमरः राम
६६ ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ रूपप्राप्तं चिबुकं वर्णयति कराग्रेणेति। हे गिरिसुते तव चिबुकं कथंकारं कथं कृत्वा केन प्रकारेणेत्यर्थः ब्रूमो
वर्णयामो न कथमपीत्यर्थः। वर्णनप्रकारविरहे हेतुं वदन् चिबुकं विशिनष्टि उपमैवोपसंस्कार्येत्याप्तु। औपम्ये
न रहितमौपम्यरहितं। न ह्यात्र स्वरूपमात्रं वर्णनीयमित्यभिप्रायेण विशिनष्टि। वत्सलतया मिलितेन तु
हिनागिरिणा कराग्रेण स्पृष्टं रतिगिरेरपि स्नेहजनकत्वेनास्मिन्नत्वं ध्वन्यते मुहुर्वारंवारमधरपानाकुलतया

कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया गिरीशेनोदस्तं मुहुरधरपानाकुलतया कर
ग्राह्यं शंभोर्मुखमुकुरवृन्तं गिरिसुते कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितं॥८७॥

गिरीशेनोदस्तमुत्क्षिप्तं। एतेन कामविरोधितोऽपि महादेवस्य कामजनकत्वेन निरूपमं सौन्दर्यं सूच्यते। एते
एवं भूतं मुखमुन्नमितेते शंभोः करेण ग्राह्यं ग्रहीतुं योग्यं मुखं मुकुर इव मुखमुकुरस्तस्य वृन्तमिवेत्यर्थः। दर्पणे मु
कुरादर्शावित्यमरः ८७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ श्रीभवानीग्रीवां वर्णयति। भुजेति। मुखं कमलमिव मुखलं तस्य यत्रात स्य त्विषं शोभां कमलनालसादृश्यं वक्ति ग्री
वां विशिनष्टि कंटकवती रोमाञ्चवती। नित्यमिति पदं भुजयत्रसंबध्यते। यस्याः अधो हारलतिके व हारलतिका मृणा

भुजाश्लेषान्नित्यं पुरविजयिना कंटकवती नव ग्रीवा धत्ते मुखकमलनालश्रियमियं स्वतः
स्वेता कालागुरुबहलजम्बालमलिना मृणालीलालित्यं वहति यदधो हारलतिका॥६८॥

लीलां मृणालशोभां वहतीति विभर्ति। मृणालीसादृश्यार्थं हारलतिकां विशिनष्टि कालागुरुः कृष्णागुरुस्तद्बहलजम्बा - राम
लः इव सनेथा तेन मलिना॥ स्पष्टमन्यत्। जम्बाल शैवले पंक इति मेदिनीकरः॥६८॥ ॥ ॥ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गलेरेखात्रयमुन्नेह्नन्नेह्नमानो वर्णयति। गले इति। हे गतिगमक गीते कविप्रेणे ते नव गले स्थिता लेखो रेखा विवाद
व्याख्यानद्धप्रगुणगणसंख्याप्रतिभुव विभु वपिराजंते इत्यन्वयः। अत्र ब्रह्मलोः यं कृत्वि यइत्यत्रैवेवशादेइ९ यः गतिस्त
त्रत्वरूपज्ञानं तस्य गमकं प्रापकं प्रापकं संगीतशास्त्रं तत्रत्या निगीतानि तेषु एकाग्रमुख्या वासौ निपुणा गतिगमक ते
कनिपुणेन त्वसंबोधनं तथा। यद्वा गतीनां तत्तत्कलानुपायानां गमकानि बोधकानि चतुर्दशविद्यास्थानानि
तथान्ये वगीतानि तेष्वेकाग्रमुख्या निपुणेन त्वसंबोधनं तथा। एवं तु समुन्मीलत्वसंविदि त्वत्रो क्लेपेववयसाः श्रि

गलेलेखाति स्रोगातिगमकगीते कनिपुणे विवादव्याख्यानद्धप्रगुणगणसंख्याप्रतिभुवः विरा
जंते नानाविधमधुररागाकरभुवो त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ९२

यागलेरेखात्रयं सामुद्रकशास्त्रेणैकगुणविशिष्टा भवतीति वा पर इति वराहमिहिरमुनीनां विवादे विषये व्याख्या
संबद्धा प्रगुणगणसंख्याप्रकृष्टगुणगणगणनातस्याः प्रतिभुवो लग्नकानि लेख्यमध्यस्याइत्यर्थः। विवादव्या
नद्धत्रिगुणसंख्याप्रतिभुव इति पाठे विवाहकर्मणि व्याख्यानद्धो विशेषेण बद्धस्त्रिगुणएव्यंगलेसूत्रं तत्र यास्त्रि
त्वसंख्या तस्य प्रतिभुवा निर्लेख्य इत्यर्थः। पुवरूस्तेहतेरमाहात्रयाणां ग्रामाणां नारमध्योरणां यःस्थितिनियमस्त
रसीमानमर्यादाइव नानाविधमधुरवागाकरे तु वा नानाविधमधुरवाचामाकरस्थानानामितियामविशेषणं। ग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिगमकेसत्रतजकाभ्यां कर्त्तरि प्रतिषष्ठीसमासनिषेधे पितृस्त्रपोत्र कोहेतुश्चेति ज्ञापकात्समासः। उगितश्चेति स्त्री मार्गोद
शयोर्जातयात्राभ्युपाययोः। नाडीव्रणसरण्या चेति मेदिनीकर॥६९॥ अथ भुजवर्णनमाह। मृणालीति। मृणाली मृ
द्वीनां मृणालवत्कोमलानां। भुजा लतास्तव भुजलतास्तासां चतसृणामिति चतसृ ऋ तिसृ इति सूत्रेण दीर्घनिषे
धः नवानीभुजलतानां विषयं चतुर्भिर्मुखकर्तृकां स्तुतिं सकामा मुखे म्लानः सरसिजभवं शिवं विशिनष्टि मदनमथ

मृणालीमृद्वीनां तव भुजलतानां चतसृणां चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः
नखेभ्यः संत्रस्यन्प्रथमदनमथनादंधकरिपोश्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया ७०

नादंधकरिपोर्नखेभ्यः संत्रस्यन्स्मरन्सम्यग्ज्ञापयन् तन्न विद्यते भयं यस्मात्तदभयमेवं भवं यद्हस्तार्पणं
तद्विधेयेति हेतोर्नुतीया नखेभ्यो मदनमथनादंधकरिपोरित्यत्र पंचम्योर्भीत्रार्थानां भयहेतुरिति ने ना
मदनमथनादंधकरिपोरिति पदद्वयोपादानं तु भयहेतुत्वसंभावयितुं॥ नखानां तु भयहेतुत्वसंभावि राम
तमेवास्ति पूर्वं मदनेन मेन एकस्य शीर्षस्य छेदनात्॥७०॥ रामरामराम ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथकरवर्णनमाह नखानामिति हे भवानि ते त्वत्करणमस्तकाहि कथ्यते केन प्रकारेण कथय आवर्णयामः साम्प्रा
ताविति शेषः ॥ कथ्यते इति लोकोक्तिमनुसृत्याह ॥ अस्मन्मित्यत्र च श्रीहरिति पाठे अमीच यमितियोज्यं नखानामुद्योते
र्दीप्तिभिः नववनलिनरागनवरक्तोत्पलगर्वाहारिहसतामिमिति करविशेषणं साम्यमंगीकृत्याहाकदाविदिति ॥

नखानामुद्योतैर्नवनलिनरागं विहसतां कराणां ते कान्तिं कथय कथयामः कथमसं करा
चिद्वासाम्यं भजतिकलयाहन्त कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसणदलं ॥

श्रीभवानीचरणकमलध्यानजन्यपरमानंदद्योतकोहं त्वोतिशङ्कः कलयाघोऽहं श्रीनक्रीडंती चासौ
लक्ष्मीश्च क्रीडल्लक्ष्मीस्तस्या लाक्षारसाणि दलानि यस्मिंस्तत्तथा तस्य छटा अस्मत् ॥ ॥७१॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथश्रीभवानीकुचकलशौ स्तौति समम् इति समम् इति अव्ययं। प्रस्नुतं क्षरत्पयो मुखं यस्य तत्तथा। स्कन्दमन्त तद्र्वि
द्विरदमोक्तं स्तनयुगं विशिष्यन्ते हमाण आह यत्स्तनयुगला लोक्य हेरंबो गणेशः स्वकुंभौ मस्त ह्रौ शो झटिति शीघ्रं
हस्तेन मृशं ज्ञातं ह्रौ परिमृशति स्पृशति। स्वकुंभस्य स्पर्शेन हेरंबवदन हेरंबं विशिष्य मातुः स्तनयुगलेः स्पर्शे

समं देवि स्कंदद्विपवदनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं यदा
लोक्याशङ्काकुलितहृदयो हासजनकः स्वकुंभौ हेरंबः परिमृशति हस्तेन झडिति ७२

सा दृश्या स्वकुंभतत्र स्तनः आयत्तु नया आकुलितं हृदयं यस्य सः अनेन व्यामानं मृदु व्यवहारेण निकटवर्त्तिनां राम
हासजनकः कुंभो तस्य न्तरे हाक्तिम ह्रौ शेरा ह्रस्तान्तरे कायुकेच्छ रनार्पा स्वपरे ह्रौ वत्तु गुज्जुला वितिमे हिनीकरः ३९
७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरपि स्तनकलशावुक्ते माल्ये वर्णयति अमू इति पातालकेनगपतिर्हिमवांस्तस्य पताका विलोक्य मानेइत्यर्थः। अमृतरसमाणिक्यानी
चामृतरसमाणिक्यानि चामृतरसमाणिक्यानितैः पूर्णौ च तौ कलशौ चेति मध्यपदलोपी समासः। अत्र भवत इति क्रियापदमध्याहार्य
अत्र कलशावित्यत्र कुतुपाविति पाठे कुतुपो चर्ममयस्नेहपात्रे वक्षोजयोरमृतरसमाणिक्यकलशत्वे संदेहं निराचष्टे नो स्या
केमनसि संदेहस्पन्दोन अल्पोपि संदेहोनेत्यर्थः स्पदि किंचिच्चलन इति धातुः संदेहाभावमेवार्थायत्या द्रढयति तौ वः

अमूतेवक्षोजावमृतरसमाणिक्यकलशौ न संदेहस्पन्दो नगपतिपताके मनसि यः
पिबन्तौ तौ यस्मादविदितवधूसंगमरसौ कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ ७२

क्षोजौ यद्वा तौ प्रसिद्धौ द्विरदवदनक्रौञ्चदलनौ अस्मिन्पक्षे प्रसिद्धवाचिना यच्छब्देन तच्छब्दापेक्षा न। अद्यापि कुमारौ पंचवा
र्षिकौ अविदितवधूसङ्गमरसाविति विशेषणेन नामापि सदाकुमारत्वं सद्यते सदाकुमारत्वात् अन्यथा नुपपत्तिरेवात्र मृत
रसमाणिक्यकलशत्वं वक्षोजयोर्गम्यते इत्यर्थः कुतः कृतेः स्नेहपात्रे सेवाल्यात्कुतुपः पुमानित्यमरः ७२॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तनयुगले तुङ्गौ शोभमानां हारलतिकां शोभितैवहतीति हे अङ्गवते तव कुचाभोगो हारावरान्तिकां वहतीत्यन्वयः हारलतिका
मुखेहस्मानो विच्छिन्नहि पुरविजयिनः प्रतापव्यामिश्रां कीर्त्तिमितिव अत्र देहलीदीपकन्यायेन पुरविजयिना हृद्भयवत्वं

वरतनुः स्वस्तनं वेदनमवदनकुम्भप्रतिकृतिः समारब्धां मुक्तापलिभिरमलां हारलतिकां
कुचाभोगो बिम्बाधररुचिभिरन्तः शबलितां प्रतापव्यामिश्रां पुरविजयिनः कीर्त्तिमिव ते ७४

वध्यते किंवा काराव धरौ विंबाधरौ तयोरुचिभिः कान्तिभिरन्तं मध्ये शबलं चित्रं रूपं संजातं यस्याः सा शबलिता तां चितां हार
लतिकां विशेषणं स्तनेरम्भवदलो गले शातस्य कुम्भयोरिव प्रतिकृतिः प्रतिमानं यस्य इति कुचाभोगविशेषणं समारब्धां राम
निर्मितां ७४ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथपूर्वार्द्धेन कुचकलशवर्णनपूर्वकं मध्यवर्णनमाह कुचविति हे देवि तव कुचौ कनककलशाभौ कलयतः एकं लिङ्ग क्लीनः कलि
शशौ कुम्भौ तौ त्वर्थे लिचाभष्ठः परिणामप्रयुएव स्विद्यच्चेतन्नदं च स्विद्यन्नर इव तत्र घटित इव युः कुर्पासः सद्यो जलद्विदुरौ नदंर
नशालौ दोर्मूलं कषन्तौ भारातिशयेन हिंसन्तौ एवं कुचौ निर्वर्ण्य मध्यमवर्णनमाह हे त्वं राहेत्र हे देवि इति पद्यो प्रकारेण च

कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ कषन्तौ दोर्मूलं कनककलशाभौ कलयतः
तव त्रातुं भङ्गादलमिति विलग्नं तनुभुवा त्रिधा नद्धं देवि त्रिवलि लवलीवल्लिभिरिव ७५

कलशद्वयेन यो भङ्गस्तस्मात् त्रातुं रक्षितुं तनुभुवा कामेन तव विलग्नं मध्यं त्रिवलि लवलीवल्लिभिस्त्रिधा नद्धं बद्धमिव अलमति
शयेन लवली लोके लवङ्ग इति प्रसिद्धा लता इव शोभते च भिन्नक्रमः विलग्नं तु स्त्रिया मध्ये चिपुस्याल्लग्नमात्रक इति मे
दिनीकरः ७५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्तनवर्णनमाह तवेति हे धरणिधरकन्ये तव स्तन्यं स्तने भवं स्तन्यं दुग्धं सारस्वतीवाग्देवी तस्या अयं सारस्वतः पयःपारावारः क्षी
रसमुद्र इव परिवहतीति हृदयतो हृदयेन मनसा गम्यते तर्कयामीत्यर्थः भवानीस्तन्यस्य सारस्वतपयःपारावारत्वं फलकल्पयिता

तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः पयःपारावारः परिवहति सारस्वत इव दयाव
त्या दत्तं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता ७६

हृदयेति यत यस्माद्धेतोस्तवस्तन्यं द्रविडदेशोत्पन्नशिशुर्द्रविडशिशुरित्यात्मानमाह। आस्वाद्य पीत्वा प्रौढानां अद्भुतां कवीनां मध्ये॥
आत्मानं कविमाचष्टे कवयति कवयतीति कवयिता कविरजनि जातः अकर्म्मकोऽत्र वदि ७६

५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ रोमावलिमुत्प्रेक्षमाणो वर्णयति हरक्रोधेति॥ अवलीढेनास्वादितेन वपुषेत्यर्थः नाभीसरः इनाभिसरस्तस्मिन् कृतसम्पः
कृतपातः अत्रोत्तस्थौ इति क्रियापदमध्याहार्यं तस्मान्नाभीसरसः धूमे लतिकेव धूमलतिकां जन इति जानीते एवं जानीते

हरक्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते नाभीसरसि कृतसंपो मनसिजः समु
त्तस्थौ तस्मादचलतनये धूमलतिका जनस्तां जानीते जननि तव रोमावलिरिति ७७

इतीति किं रोमावलिरिति अत्रेत्यर्थप्रदर्शनमात्रं क्रियते तेन जानीत इति क्रियापदसंबंधाभावाद्द्वितीयान्त कामस्य
नाभीसरसि पतनं धूमलतिकोत्थानं पेतिद्वयमुत्प्रेक्ष्यते स्पष्टमन्यत् ७७ रम रम रम

पुनरपि रोमावलिमन्योन्यमालो वर्णयति यदेतदिति हे उन्निहे शिवे तव कृशे मध्ये पदे तत् किंचिद्रोमावलिशब्दवाच्यं भाति तत्सुधि
यं सुबुद्धीनां उपमानोपभावस्य वहारस्व तुलनं इत्यर्थः व्योमेव भातीत्यर्थः कालिंदीतनुतरोपलतरंगस्येवाकृतिर्यस्यां भातक्रिया.

यदेतत्कालिन्दीतनुतरतरङ्गाकृति शिवे कृशे मध्ये किंचिज्जननि तव तद्भाति सुधियां विम
र्दादन्योन्यं कुचकलशयोरन्तरगतं तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ७८ रम

यं तत्तथा रोमावलीस्वरूपविशेषणं वा व्योमविशेषणं तु स्वेह्नमाणा आह अंतर्गतं कुचकलसमध्यगतं कुचकुम्भयोरन्यो
न्यं विमर्दात्सरलेसाद्धेतोस्तनुभूतं ह्रस्वीभूतमाश्रतएव कुहरिणीं प्रसस्तकुहरां नाभीं प्रविशदिवेति त्रयमपि व्योमविशेषणं रम
तनुः कायतेविस्तीर्य्याद्विपल्लेविरलेकृशाद् इतिमेदिनीकर ७८ ४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वस्तुधोन्मेस्मादौ नाभिवर्णयन्ति स्थिरइति हे गिरिजे तव नाभीइति एवंप्रकारेण विजयते सर्वोत्कर्षेण वर्त्तत इत्यन्वयः
सर्वोत्कर्षप्रकारानेवाह परमपावनश्रीनत्वात् परमाह्लादकत्वात्सर्वस्येति । स्थिरो गंगावर्त्त इवेति शेषः गंगावर्त्तः कदाचि
त्कइत्यतो विशेषणं स्थिरइत्यतो भूपमास्तनौ मुकुलाविधस्तनमुलोमानमुकुल विशिष्टा वा सो रोमाः वलिलताचेति न

स्थिरो गंगावर्त्तस्तनमुकुलरोमाः वलिलताजलावालं कुण्डं कुसुमशरतेजोहुतभुजः
रतेर्लीलागारं किमपि तव नाभीति गिरिजे बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ७८

यातस्या जलावालं जलं सेकार्थमालवालमिवेत्यर्थः कुसुमशरस्य तेतः मनापोहतभुगिवेति तथा तस्या कुंडं स्थानमि
वारतेः कामभार्यायाः किमप्यनीर्वचनीयं लीलागारं कौतुकागारमिव अन्ये हि सिद्धाः सिद्धिगह्वरे साधयन्ति तथा
गिरिशनयनानां सिद्धेः पुरुषार्थसाधनस्य बिलद्वारं गह्वरमिवेत्यर्थः कुंडमग्न्यालये मानमदेवजला शयेइति मेदिनीकरः ७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मध्यं कुशलप्रार्थनाछलेन वर्णयति निसर्गेति हे शैलतनये तेन त्वया मध्यस्य कुशलं भवतीति कुशलप्रार्थनाछलेनातिशोभा वर्ण्यते
मध्यस्य कुशलप्रार्थना मृदुकुशलसंभावनायां सत्यां भवेदतो कुशल हे तन्नवदर्श्य वस्तु धावित्वेन निसर्गस्यातिना क्लमस्त्वे
दं जुषत इति क्लमजुट् तस्य जुषी प्रीतिसेवनयोरिति धातुः नमन्ती मूर्त्तिः स्तनस्यान्नत्वात्तस्य श्रवणदाढ्र्यकपुष्टं तं पुत्र वहतीति स

निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो नमन्मूर्त्तेर्नारीतिलक शनकैस्त्रुट्यत इव चिरं
ते मध्यस्य त्रुटिततटिनीतीरतरुणा समावस्थास्थेम्नो भवतु कुशलं शैलतनये ८०

नलपृष्ठे पुंवद्भावान्नुमभावः यद्वा तव नारीत्वेन मन्नी वासौ मूर्त्तिश्च तस्या मध्यस्य कुशलं भवतीति संबंधः अधिकरणस्था 43
त्रयष्ठ्यो इष्टव्याः शनकैर्मन्दं मन्दं वलिषु त्रिवलीषु वध्यतः त्रुट्यतीति त्रुट्यतस्त्रुटितः किंविशिष्टः सवासो
तटिनीतीरतरुश्चेति तेन समस्तस्योः अवस्थास्थेमायस्य तत्त्वात्तस्य स्थिरस्य भावस्थेमा वः स्थेमाः नाभौ वलिसिद्धिस्य एम
त्रिविधपयसस्मे ८० ४३

अथ नितंबं वर्णयति गुरुत्वमिति गुरुत्वं गौरवं विस्तारं विशालत्वं निजाश्रितम्बा स्वकीयात्कठकात् आछिद्य गृहीत्वा जघनरू
पेण नितंबरूपेण निदधे स्थापितवान् प्राङ् चासौ भारश्च प्राग्भारो नितंबः प्राग्भार इव नितंबप्राग्भारः स्थगयति आछाद

गुरुत्वं विस्तारं क्षितिधरपतेः पार्वतिजान्नितंबात् आछिद्य घटयित्वा जघनरूपेण निदधे अत
स्ते विस्तीर्णं गुरुतरयमशेषां वसुमतीं नितंबप्राग्भार स्थगयति लघुत्वं नयति वः ८१

यतिस्म हृमन्यत् एतेनात्युक्तिवचनेनातिगुरुत्वविशालत्वे नितंबस्य सूचिते जघननितंबशब्दौ च पर्यायौ जघनं स्या
त्स्त्रियाः श्रोणिपुरोभागे करावपि नितंबः स्कंधरोधसोः स्त्रियाः पश्चात्कायपदेः कटके करिणामेके इति च मेदिनीकरः
८१

अधुनोरुद्वयं जानुद्वयं वर्णयति करीन्द्राणा इत्येकेनन्वयो केन हे गिरिसुते भवती ऊरुभ्यां ऊरुद्वयं निर्जित्य जानुभ्यां विविधकरिकुं
भद्वयं अपि विजितवत्यन्वयः विविधा विधाप्रकारो यस्मात्तद्विविधं तच्च तत्करिकुंभद्वयं चेति तथा किन्तु भयमिव पेन्द्रायाम

करीन्द्राणां शुण्डाः कनककदलीकाण्डपटलीमुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती
सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विजिज्ञे जानुभ्यां विविधकरिकुंभद्वयमपि ८२

हे करीन्द्राणां शुण्डाः हस्तान् कनककदलीनां काण्डानि स्तम्भास्तेषां पटलीं समूहं कौ च तान् उभाविति पेन्द्रायामाहोरुभ्यामिति
सुष्ठु गोलत्वं यथास्यात्तथा वृत्ते वर्तुले इति सुवृत्ते ताभ्यां पत्युर्महादेवस्य प्रणत्या प्रणमेन कठिनाभ्यामीषत्कठोरीभ
भ्यां इति जानुविशेषणं ८२

रम
४४

५५

अथो स्त्रे स्मानो जं घे व र्ल्यति॥ पराजेतुमिति हे गिरिसुते। त वृ जं घे विषमविशिखो रुडं पराजेतुं स्तं गाव हू ते नि षाढमहं शंकरस्यर्थः
स्ववा ण पे ह यो हि गुणाः पुरा ग मे य यो स्तो जं हं यो नि षङ्गः त्ते ह्ना पकमा ह यद ग्ने व यो र ग्ने पादयुग लीन स्वाग्या णि छ मा नि

परा जे तुं रु डं हि गुण शरग मौं गिरिसुते निषङ्गौ जं घे ते विषमविशिखो वाढ म हू त्
यर गे ह व प ने द श शर फलाः पादयुग लीन स्वां ग छ ष्मानः सुरमुकुर श्मानो व निशिताः ८३

ये षां ते दश संख्याकाः शर फ दश प ने ॥ अत्र शा स ग्र लो हादि वाचकः फलशब्दः स च पुलिङ्गः ॥ सुरमुकुरा नि श्मा ला नीव यानि ते षां
ओघेन निशिता स्तीक्ष्णाः ८३ १५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चरणौ वर्णयति॥ श्रुतीनामिति हे मातः श्रुतीनां मूर्द्धान उपनिषदः शेखरतया शिरोभूषणतया यौ चरणौ दधति तावेतौ ममापि शि
सि धेहीत्यन्वयः चरणयोः परमपावनत्वमाह पशुपतिजटाजूटः समुद्रस्तत्र तटिनी गंगा ययोर्याः पाद्यं पाथः पादप्रक्षालनार्थं ज

श्रुतीनां मूर्द्धानो दधति तव यौ शेखरतया ममाप्येतौ मातः शिरसि दयया धेहि चरणौ
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षालक्ष्मीररुणहरचूडामणिरुचि
८६

लं पादार्घ्यायदिति तद्धितोयप्रत्ययः प्रकृत्यर्थ एवात्रापि विवक्षितः लक्ष्मीरिच्छा ययोर्लाक्षाशोणार्थं लाक्षाद्रव्यमित्य
र्थः अरुणतरचूडामणिरुचिर्लाक्षाशोणता ययोरित्यर्थः अरुणहरिचूडामणिरुचिरिति पाठे स एवार्थः॥ तथा हरी रम
त्यत्र हरेरिति पाठोऽपि स्पष्टार्थः ८४ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरपि चरणौ वर्णयति हिमानीति हे जननी त्वत्पादौ सरोजे जयतः इतीह किं चित्रं न किमपीत्यर्थः जयहेतुमाह ताम्रगुणान्वितं पदौ वि
विशिषन्ति भवहेतुमाह तान्दोषानवकं सरोजमपि विशिन्ति हि हिमानीति हिमान्याहंतत्वं हिमानीहंतत्वं हिमानीहंतत्वं निश

हिमानीहन्तव्यं हिमगिरितराकान्तिवरौ तु निशायां निद्राणं निशि च परभागे च विशदे
परं लक्ष्मीपात्रं श्रियमपि सृजन्तौ प्रणयिनां सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किं ८५

लं मुकुलितं परभागे दिवसे च विसदावस्थानाविन्यर्थः प्रणयिनां भक्तानां श्रियमपि सृजन्तौ ददतौ ८५ रामरामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चरणं ध्रुवं तु स्कन्धावाकारान्तरेण वर्णयति ममेति हे जननिनिवासे पादयोर्द्वयं नमो वा किं कुमो नामानं किमिदं किंस्वरूपं त्रमो॰
निरूपमं तव पदद्वयं नमन मित्यर्थः नमनस्य निरूपमं वै नमस्य निरूपं मतेनेति निरूपमत्वं व कुयदद्वंद्वं विशिनष्टि स्फुरदविरसो
पस्पृतयाः लहूकस्तद्वने ग्राचकर्मधारय एवं कोमनुपप्रत्ययोग विवृताया नमो वाकु इति पाठेन मो रूपं वाच मित्यर्थः अस्मि
नपक्षे पदयो द्वंद्वामेतत्र चतुर्थी क्रियपयोपपदस्याच तच्छेदवदिदं शद्वेऽपियच्छेदसापेक्षइति यच्छेदेनपदं द्वंद्वं विशिनष्टि

नमो किंनु मे नयनरमलीयाय पदयोस्तवास्मै द्वंद्वायस्फुरदविरसालक्तकवते
अरूपस्वरूपं तंयदि मिहनभोनायस्पृहयते पयःनाभीस्थानपमदवनकंकेलितरवे ८६

यदितियस्या मिहनं पदमिहननं तस्मैप्रत्यदकं र्त्रेरिकताऽनायेत्यर्थः स्पृहेरीप्सितइति चतुर्थी स्पृहयतीति स्पृहयतत तस्मै तस्मिन
कंकेलितरुरशोकेवृक्षे स्तस्मो कंकेलिशद्वेन तरुत्वप्रतीते तरुशद्वेऽ विशेषणमिति विशेष्यं विशेषणमिति प्राप्तस्य समासस्य
निषेधः कंकेलिशद्वेन फलस्यापि प्रतीतेस्तरुशद्वस्य विशेषणत्वात्समासोप न्नोमघो ऽपदद्वंद्वं तादवमसावशोकवृ
क्षेः स्पृहयति इति पशुपतिस्तस्मै प्रस्पृहयतीति भावः स्त्रीचरणतललताडनेन वा शोकवृक्षस्तत्कालमेव पुष्पितो भवती
तिकाव्येप्रसिद्धमेवाशास्याद्धि कल्पोपमयोरितिमेदिनीकरः ८६ राम ४६

46

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरपि किंचिदुत्प्रेक्षमाणः स्तौति मृषेति हे जननि ते तव चरणकमलेन भर्त्तारं श्रीमहादेवं ललाटे ताडयति सति ईशानरिपुना कंदर्पेण तुलाकोटिक्वणैर्मंजीरशब्दैः किलकिलितं शत्रुपराजयमालक्ष्योच्चैः शब्दकृतं इत्यर्थः तुलाकोटिक्वणैरित्यत्र प्रकृत्यादिभ्यस्तृ

मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं ललाटे भर्त्तारं चरणकमले ताडयति ते
चिरादन्तःशल्यं दहनकृतमुन्मूलितवता तुलाकोटिक्वाणैः किलकिलितमीशानरिपुणा
८७

तीयेति तृतीयेति तृतीया दहनकृतं दाहजन्यमन्तःशल्यं हृदयेशल्यमिव वैरमुन्मूलितवता स्फोटितवता ईशानरिपुविशेषणं त
र्हि ताडने हेतुं वदन् भर्त्तारं विशिनष्टि मात्रे नाम्नि स्खलनमन्यथोच्चारणं कृत्वाऽथ कृतं वैलक्ष्यं लज्जा तेन प्रयोजककर्त्तृन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मितं चिराद्दृश्यं बहुकालमित्यर्थः ८७ अथ प्रपदाग्रं वर्णयति पदमिति हे देवि तेतव पदं पादाग्रं सद्भिः कठिनकमठीकर्परतुलां क
थं नीतं उपयमनकाले विवाहकाले पुरभिदा शिवेन बाहुभ्यां आदाय दृषदि न्यस्तमिति यत्तत्कथं नीतं एतत् द्वयमप्यनुचितमित्यर्थः
कठिनकर्परतुलां कठोरकच्छपीकपालोपमां दयमानेन दयायुक्तेन मनसोपलाहितेन पुरभिदा वधूपति पाठे पक एवार्थः मनमो

यदन्तेकान्तीनां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठीकर्परतुलां कथं
वा बाहुभ्यामुपयमनकाले पुरभिदा यदादाय न्यस्तं दृषदि दयमानेन मनसा ८८

पिसत्स्मवपुः शरद्वाद्यत्वात् प्रपदं विपिनहि कान्तीनां यदं स्थानं परमसुंदरत्वात् विपदामपदं स्थानं नीचं यातो हि कर्म्मकर्तेनैक राम
स्मिन्कर्म्मण्युक्तेः पि द्वितीयं कर्म्मानुक्तं इति कठिनकमठीकर्परतुलामित्यत्र द्वितीया कर्परस्यात्कपाले च शास्त्रभेद कटाहयो ५७
रिति मेदिनीकरः स्वर्ण्णरेखापिकाचित्याद्यः ८८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथपादपद्मनखान्वर्णयति नखेति हे चण्डि ते नवचरणे नखैर्दिव्यानां तरूणां हस्ततरवनाकस्त्रीणां स्वर्गेवनितानां देवाङ्गना
नां करकमलसङ्कोचे नशशिनखं अशेषस्येति नखविशेषणं भवानीचरणनखान् दृष्ट्वा नमस्कुर्वतीनां देवाङ्गनानां करकम

नखैर्नाकस्त्रीणां करकमलसङ्कोचशशिभिस्तरूणां दिव्यानां हसत इव ते चण्डि चरणौ
फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ८८

लानि मकुलं तीति नखानां शशित्वं स्वस्थेभ्यः स्वर्गेभ्यः दिव्यतरुभ्यो भद्रां कल्याणरूपां श्रियं लक्ष्मीं अनिशं निरन्तरं अह्ना
य शीघ्रं ददतौ तौ प्रयच्छन्तौ तरूणामिति मतभेदेन कर्म्मण्यपि षष्ठी पद्यपि चरणयोरत्र वर्णनं प्रतीयते तथापि कारणत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भवानीचरणकमलनिर्णेजनजलं जे पानं प्रार्थयमानस्तन्निर्णेजनजलं स्तौति कदेति हे मातस्तव निर्णेजनजलं कदा काले पिबेयं कथये
त्यन्वयः पुरेव त्रिनीभवानी परिकल्प्य पृष्ठाति कथयेति कदे सन्नमत्स्यार्थोः विवहितः यह्यकाले संसारचक्र प्रवर्तको महालेकदा क
स्मिन्मासे कस्मिन्मते कस्मिन्दिने वेत्यर्थः भवानीचरणनिर्णेजनजलविशिनष्टि पद्वारेण निर्णेजनजलं प्रकृत्याम् कानां वाक्यारव

भा

कदा ति मातः कथय कलितालक्तकरसं पिबेयं विद्यार्थी तव चरणनिर्णेजनजलं ।
प्रकृत्या मूकानामपि च कविताकारणतया यदा धत्ते वाणीमुखकमलताम्बूलरसतां ॥ ९०

रहितानामपि कविताकारणतया हेतुना वाणीमुखकमलताम्बूलत्वनेव वाणीमुखकमलताम्बूलरचनात्मा धत्ते करोति यद्वा वाणीमु
खकमलताम्बूलरचना वाणीमुखकमलताम्बूलरचनां येन चरणनिर्णेजनजलेन प्रकृत्यमूकानामपि मुखकमलं ताम्बूलं यथा
शोभयति तथा वाणी शोभयतीत्यर्थः ॥ रचनाशोनगरसतामिति पाठे एक एवार्थः ॥ ९० रम रम रम रम ४८

48

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथचरणयोर्लीलागतिंवर्णयतिपदेति हे मातस्तवचरणयुगलंभवनकलहंसानजहतीत्यन्वयः कलहंसानुद्देशमालोविशिनष्टि खे
लाविद्यतेयत्रतत् खेलंसलीलंचलन्तोपिपदन्यासक्रीडाकौशलमतिशयेनचलचोः पितवंपदयोर्न्यासक्रीडाप्रत्येपालीलातस्याःपरि

पदन्यासक्रीडापरिचयमिवारब्धुमनसस्खलन्तस्तेखेलंभवनकलहंसानजहति सुवि
हैपेशिक्षांसुभगमणिमंजीररणितछलादाचक्षाणंचरणयुगलंचारुचरितं ९१

यःशिक्षातामारब्धुमनसइवात्तुपेदवस्यमइत्येनेनतुमुल्लोपः चरणयुगलमुद्देशमालोविशिनष्टिसुविहैपेशिक्षामाचक्षा
णमुपदिशदिवेत्यर्थ चलंस्मादितिपाठेभवानीविशेषणं स्पष्टमन्यत् ९१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं तत्तदवयवभिर्वर्णनद्वारा श्रीमन्निर्निर्वर्ण्ये दानीं श्रीमन्निंमेव बहुधा घिशिजन्वर्णयति अरालेति शंभोः करुणैव कान्तिनिरुप
मा अरुणा अरुणरूपश्रीमवानीमन्निंर्जयतीत्यन्वयः मंदहसिते प्रकृत्या सरला प्रकृतिसरलाः स्वाभाविकमन्दहसितेन स

अराला केशेषु प्रकृतिसरला मंदहसिते शिरीषाभा चित्ते दृषदिव कठोरा कुचतटे
भृशं मध्ये तन्वी पृथुरसि वारोहविषये जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा
९२

५१

र्थः प्रकृतिरसिकेति पाठे प्रकृत्या रसिका अनुरक्तेत्यर्थः आरोहविषये करिप्रदेशे अत्रं सर्वत्र विषये सप्तमी ड८ व्याः ९२

राम
४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैवं वर्णितश्रीमन्निम्नधिष्ठात्रीं श्रीभवानीपरमोदारत्वेन स्तौति पुराणान्तेरिति हे मातस्त्वं पुराणान्तेरं तत्पुरं पदमधिष्ठितासि तात त्वत्
चरणयोः सपर्याप्रजा तरलकरणानां प्रजार्थं यथेन्द्रियाणां अमुलमाश्रुलमानवतीति तथा पेते शान्तमखमुखाइन्द्रदयः ते ६३

पुराणान्तेरत्नपुरमसित तत्त्वच्चरणयोः सपर्यामर्यादा तरलकरणानामसुलभा तथा
प्येते नीताः सततमखमुखाः सिद्धिमतुलां तव द्वारोपान्तः स्थितिभिरणीमाद्याभिरमराः ६३

व द्वारोपान्ते स्थितिभिर्द्वैवारिकीभिरणीमाद्याभिः सिद्धिभिरेरे वातुलां सिद्धिं नीताः प्रापिताः सपर्याविधिर्न हि मर्यादा अवधि
भूता यद्वा सपर्याया मर्यादा सपर्यामर्यादे त्येकं पदं अस्मिन्पक्षे मर्यादा कालावधिः भवानीचरणयोः सपर्यायाः अवधी

संवत्सरप्रवरमणिकणिकाभगतान्

ननु ब्रह्मादयो देवा अपि पूज्याः सन्तीति कथं भवानीचरणयोरेव पूजनत्वमित्याशंक्य ब्रह्मादीनामपि भवान्याः सेवकत्वमाह गता इति
द्रुहिनहरिभद्रेश्वरपदान् वाचकं तेन बिभ्रतीति तथा द्रुहिनहरि भद्रेश्वरादेवा इत्यर्थः भद्रेश्वरो महादेवसन्निभेदो म

गतास्ते मंचत्वं द्रुहिनहरिभद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः
त्वदीयानां भासां प्रतिफलनलाभादरुणितः शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकं
९४

मंचत्वं पर्यंकत्वं शिवोपि तेन तव दृशां शरीरसन्निधानात् शृंगारो रस इव कुतुकं परमसुखं दोग्धि प्रापयतीत्यर्थः अत्र पुरणोपे
इहि: स्वच्छच्छायया स्वात्मप्रद्योतेन घटितश्चासौ कपटप्रच्छदः प्रस्तरस्तथा कपटेन मायया प्रच्छदपटः कपटप्रच्छदपटः
९४

रम
५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ सकलदेवमध्यात्तद्देवतारूपेण भुज्यमानं चंद्रमंडलं भवानीभोगोपकरणकस्तूर्यादिभांडत्वेनाध्यवसीयमानो भवानीभोगेति कलंकइति कलं
कोलोहितं कस्तूरीहृष्णत्वसाम्यात् रजनीकरविंवं चंद्रमंडलं जलमयं जलप्रचुरं एतत्तु परमार्थतः शुक्लत्वसाम्यात् कलारूपैः कर्पूरै
र्निविडितं परिपूर्णं मरकतविकारकरण्डं मरकतकरण्डं मरकतमणिमयं भाजनमिति मेखलाभिप्रायेण निविडतमिति पाठे ए

कलङ्कः कस्तूरी रजनिकरविंवं जलमयं कलाभिः कर्पूरैर्मरकतकरंडं निविडितं
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयो भूयो निविडयति नूनं तव कृते ४५

कएवार्थः अत्र स देवी भवतीति मया परं द्रष्टव्यं यतः कस्तूर्यादिभाजनं चंद्रमण्डलमतः प्रतिदिनं त्वद्भोगेन रिक्तकुहरं भूयोभूयः समरं चंद्र
मंडलं विधिः पुनः पुनर्निविडयति कस्तूर्यादिभिः संपादितीति नूनमहं तर्कयामीत्यर्थः तवकृते तवदर्पणकृते इत्यन्वयं प्रयोजनवाचि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भवानीध्यानं मोक्षफलकमिति दर्शयन् भवानीं स्तौति स्वदेहेति हे नित्ये द्युतिभिः किरणरूपाभिश्चाणिमाद्याभिः सह त्वं निषेव्य इति यः
सदा भावयति चिंतयति त्रिनयनसमृद्धिं तृणयतस्तृणवन्मन्यमानस्य तस्य महासंवर्त्ताग्निः नीराजनविधिं विरचयतीति किमाश्चर्यमि

स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो निषेव्ये नित्ये त्वामहमिति सदा भावयति यः
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्त्ताग्निर्विरचयति नीराजनविधिम्
५६

मित्यन्वयः एतेन निरंतरभवानीध्यानेन ध्याता ब्रह्मस्वरूपसंपत्त्या जगत्पूज्यो भवतीति सूचितं भवति २६ रामराम राम
५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्मुभवानीध्यानेनकथंबुद्धसंपत्तिरित्याशंक्यभवानीब्रूतेवस्त्रीत्वप्रतीतिस्तुतत्रभगवतिइतीममर्थीहरदृष्टांतेनदर्शयन्ध्यानमेवेदेन(
भुक्तिदातत्वेनभवानींस्तौतिसमुद्भूतेति त्वद्दत्तशक्तिभूकोमदनोहरस्यमनसित्वत्भ्रांतिंहिजयंभ्रमंजनयामासेत्यन्वयः भ्रांतिमे
वदर्शयति समुद्भूतेत्यादिना कराहेकंदर्पः कदर्पवन्मोहानितं महादेवदर्शनेनरोमांचे उमेनकुसुमितकदंबस्येवद्युतिर्यस्य

समुद्भूतस्थूलस्तनभरमुरश्चारुहसितं कराहे कंदर्पः कुसुमितकदंबद्युतिवपुः
हरस्य त्वद्भ्रांतिं मनसि जनयामास मदनो भवत्या ये भक्ताः परिणतिरमीजामियमुमे
८७

नद्वपुः हे उमे वत्याये भक्तास्तेजामियं स्त्रीप्रधानविजयसुरतरूपापरिणतिः परिणामः फलं त्वद्भक्तेरित्यर्थः अयंभावः ब्रह्म
रूपायाभवान्याः स्त्रीरूपतयायेध्यानेकुर्वंतितेभक्तिंलभंतेयेतुसजातीयविजातीयस्वगतभेदशून्यंब्रह्मैवभवानीतिध्या
यंतितेमुक्तिंलभंतेइतिएतत्तुसैवाप्रसन्नावरदानृणांभवतिमुक्तयइत्येवमादिपुराणवाक्यसमहादेवगंतव्यं ८७ सम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ परमपतिव्रतात्वेन भवानीं सौतिक कलत्रमिति वैधात्रं कलत्रं ब्रह्मणो भार्या सरस्वती केरपि धनैः सामान्यतः सर्वलोकदिशिर्मोहिप्यादिनि
ह्यात्यादिभिरपीत्यर्थः एवं लक्ष्मीसरस्वत्योर्व्यभिचारं संदर्शयित्वा भवान्यास्तदन्यतया भावमाह महादेवमिति सती नाम चरमे गलमाना त्वं
पतिव्रता तासीलं मध्ये प्रथम लोगलमाणे इत्यर्थः तवकुचाभ्यां मा भो भोगतकुंचकन्दकापदलेताकुरवकतरोरप्यमुकुलनः मुलभोन

कलत्रं वैधात्रं कति कति भजन्ते न कवयः श्रियो देव्याः को वा न भवति पतिः केरपि धनैः
महादेवं हित्वा तव सति सती नाम चरमे कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ९८

भवति कुरवकतरोः सामान्यतः स्पर्शनज्ञानेऽपि विशेषज्ञानभ्रन्यतेना स्मन्नजडस्याऽपि असुलभ इति यातिरस्यातिशयोक्तिः स्त्री
णां निरीक्षणालिङ्गनाभ्यां तिलककुरवकौ सघः प्राप्तितो नवत इति काव्यप्रसिद्धिः आभोगा वारुणछत्रे सम्पूर्णतायत्नयोरपीति
मेदिनीकरः ९८ 52 रम
९२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं शिवशक्त्योरपरब्रह्मत्वेन भवानीनिर्दिष्टा त्यात्मानमनुवदन् कामत उपसंहरति गिरामिति हे महामाये परब्रह्ममहिषि त्वं
काऽपि प्रमाणैर्वक्तुमशक्या तुरीया विष्ण्वादिपत्न्यां तुरीया शक्तिर्वा चतुर्ब्रह्मस्वरूपा सती विश्वं भ्रमयसि मोहयसि स्त्रीरूपेणेति स्व
मतोपन्यासः स्पष्टमन्यदर्थः ९९ अथ भवान्येव भजनीयेति वक्तुं तद्भक्तस्य मुक्तिमुक्तीः दर्शयन् भवानीं स्तौति सरस्वत्येति त्वद्भ
जने भजनं ते सेवा तद्वतीति त्वद्भजनभाक् तद्भक्तो विधिहरिसरस्वत्या लक्ष्म्या च विजयतन्त्र्यन्वयः विधौ सरस्वत्यैव हरौ लक्ष्मीरेव तद्भ

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां तुरीया कापि त्वं दुरधि
गमनिःसीममहिमा महामाये विश्वं भ्रमयसि परब्रह्ममहिषि ९९ सरस्वत्या लक्ष्म्या विधिहरिसपत्न्या विजय
ते रते पातिव्रत्यं शिथिलयति रम्येण वपुषा चिरंजीवन्नेव क्षपितपशुपाशव्यतिकरः परब्रह्माभिख्यं सपति र
सं त्वद्भजनभाक् १०० श्री ए

क्ते नु सरस्वती लक्ष्मीश्चेति विजयः समानापतिर्यस्याः सा सपत्नी नयेति सरस्वत्या लक्ष्म्याश्च विशेषणं एकस्मिन् पत्यावुभयोः स्थित
त्वात् विधिश्च हरिश्चेति विधिहरि सर्वो द्वंद्वो विभाषयैकवद्भवतीति परिभाषया समाहारद्वन्द्वः विधिहरि जयमुक्तौ कन्दर्पजयमा
हरतेरिति स्पष्टं भवानीभक्तस्य जीवन्मुक्तिमाह एवं भक्तो जीवन्नपि तेः पशुपाशव्यतिकरो विद्यासम्पन्न आत्मा येन संज्ञा
नी सन् परब्रह्मणो मिथ्याप्रकाशो यत्र तां रसमानन्दरसमपत्यो स्वादयतीत्यर्थः १०० ॥ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं सविस्तारां कृतां स्तुतिं वृहद्घासं बोधयन् भवानीं श्रावयति नित्येति हे नित्ये भक्तेप्सोः ये हितदाने पिपत्याद्दि निधिवर्द्धिकघने स्व
र्थः नित्यं स्मयन्त इति नित्यस्मेरा तत्संबोधनं तथा नित्यामितिपारे नित्यसर्वकाले स्मेरे ईषद्धास्ययुक्ते निरंतब्रह्माविर्भावे निरवधिगु
णेः अनंतगुणो निराधानज्ञाने नित्यज्ञाने नित्यज्ञाने नियतः परविचारे कोमुख्योलिलयः आश्रयो यस्याः सा तथा तथा तत्संबोध
नं तथा नित्यमपरविभेति पारे नियमपरावेस्वव्रतपरां ज्ञानिनस्ते घ्नविघ्नपे कोमुख्यो निलयो यस्याः सा तथा तत्संबोधनं तथा

नित्ये नित्यस्मेरे निरवधिगुणे नांतिनिपुणे निराधानज्ञाने नियतपरचित्तैकनिलये
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे निरातङ्के नित्ये निशामय ममापि स्तुतिमिमां १०१

भवान्या सर्वविंतानिलयत्वेः पिज्ञानाऽभिप्रायेणैवमुक्तमिति द्रष्टव्यं नियत्या दैवेन निर्मुक्ता तन्निखिलनिगमान्तस्तुतिभिः
प्रद्यते ज्ञायते इति निखिलनिगमान्तस्तुतिपदा तत्संबोधनं तथा निगमान्ता उपनिषदः निगमान्तमातङ्कं भयं यस्या न
यानास्तीति निरातंका तत्संबोधनं तथा नित्ये विनाशरहिते॥ यथा ब्रह्मादीनां स्तुतिं निशामयसि तथा ममापीमां स्तुतिं नि
शामय शृणु इत्यर्थः नियतिर्नियमो दैवमिति मेदिनीकारः १०१ रामरामरामरामरामरामरामरामरामरामराम

राम
५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनकराज १९५४ जस्त

निशामयममाःस्तुतिमिमामित्यनेन प्राप्तं प्रात्मनस्तुतिकर्तृत्वं परिहरन्नेव वस्तुतो न मम स्वात्न त्वत्स्तुतिनापि त्वोपकारायैव न तु तवोप
कारायेत्यभिप्रायेणस दृष्टान्तमाह प्रदीपत्ति हे जननि त्वदीयाभिर्वाग्भिर्वाग्विलासैर्वावं तव वाकारायैव न तु तवोपकाराय हे व
ता यास्तव स्तुतिरित्यर्थः वाचां तवेत्यत्र षष्ठी संबधे सचाधिषाणृधिचेपत्रावः इयं एवं क्तोहु पंचम्कृतिः स्वार्थान् तु त्वद
र्थेत्यत्र दृष्टान्तमाह प्रदीपेत्यादिना वस्तुतः सौरीभिरेव प्रदीपज्वालाभिर्यथा दिवसकरनीराजनविधिस्तथा न व

प्रदीपज्वालाभिर्दिवसकरनीराजनविधिःसुधासूतेश्चन्द्रोपलजलैवैरर्घ्य घुटना ॥ ॥ ॥
स्वकीयैरंभोभिःसलिलनिधिसौहित्यकरणं त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं १०२

स्तुतिरित्यर्थः नीराजनकृत्यं ग्रंधकारनिवृत्तिरूपं वा अमङ्गलनिवृत्तिरूपं वा एतद्द्वयमपि दिवसकरे परममङ्गलरूपेन
संभवति तेषापि तास्वार्थसदैव जनीराजनं विधीयते तथा स्तुतिं हत्यस्याति शयाधानस्याभावेपि अनंतशक्तिसम्प
न्नायास्तव स्तुतिरित्यभिप्रायः स्पष्टदृष्टान्तद्वयं सौहित्यं तृप्तिः अग्निसर्प्पयोऽर्घ्यं आग्निर्ज्योतिरितिस्वनावे
व प्रसिद्धं ॥ इति श्रीरामभद्रविरचितासौंदर्यलहरीटीकामनोरमा समाप्ताः शुभमस्तु श्रीरामकृष्णायनमः

राम
५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu